SEMUSHI

# शेमुषी



University News Letter

March-2020 to January-2021

## राष्ट्रियसंस्कृतविद्यापीठमधुना राष्ट्रियसंस्कृतविश्वविद्यालयः







राष्ट्रियसंस्कृतविद्यापीठस्य राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन केन्द्रीयविश्वविद्यालयस्थानप्रकल्पने अनुमतिं प्रदत्तवद्भ्यो भारतस्य महामहिमशालिभ्यो राष्ट्रपतिभ्यः **श्रीरामनाथकोविन्दमहाभागेभ्यः** भारतदेशस्य तेजस्विप्रधानमन्त्रिभ्यः **श्रीनरेन्द्रमोदिमहोदयेभ्यः** भारतसर्वकारस्य क्रियाशीलगृहमन्त्रिभ्यः श्रीमद्भ्यः **अमितशाहमहोदयेभ्यः** संसदि यशस्वितया विश्वविद्यालयप्रस्तावं मण्डितवद्भ्यः मान्येभ्यः **डा. रमेशपोखरियाल"निशङ्क"महोदयेभ्यश्च** राष्ट्रियसंस्कृतविश्वविद्यालयः हार्दिककृतज्ञतां वितनोति ।







## राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

## NATIONAL SANSKRIT UNIVERSITY, TIRUPATI

A Central University established by an act of Parliament

(Formerly Rashtriya sanskrit Vidyapeetha, Deemed to be University)

Accredited by NAAC (Cycle-2) At A Grade

Tirupati- 517507

# विश्वविद्यालयस्य भौतिकप्रगतिः

शैक्षणिकदृष्ट्या भौतिकदृष्ट्या च एधमानः अयं विश्वविद्यालयः महतां तपोबलेन कार्यप्रगत्या च अचिरादेव विद्यापीठात् विश्वविद्यालयत्वेन प्रोन्नतिं प्राप्तः । ऐषमः कोरोनावैश्विकमहासंकष्टकालेऽपि विश्वविद्यालयस्य प्राक्शास्त्र्यादयः नियतपाठ्यक्रमाः, प्रमाणपत्रपदविकादयः अन्तर्जालपाठ्यक्रमा इति विश्वविद्यालये विविधविषयकशास्त्राध्येतॄणां संख्या समभ्यवृध्यत। एवं शैक्षणिककार्यक्रमैः निरन्तरं वर्धमानः अयं विश्वविद्यालयः भौतिकसमृद्ध्याऽपि एधमानः अस्तीति न न्यूनता भौतिकप्रगतौ विश्वविद्यालयस्य । प्रतिवर्षं विभिन्नपाठ्यक्रमेषु अधीयानानां छात्राणां संख्या वर्धत इति छात्राणां वाससौकर्ये न्यूनतावारणाय कटिबद्धः विश्वविद्यालयः मान्यानां कुलपतीनाम् आचार्याणां वि. मुरलीधरशर्ममहोदयानां नेतृत्वे श्रीमतां कुलाधिपतीनां नी. गोपालस्वामिमहोदयानां मार्गदर्शने च अत्याधुनिकतन्त्रज्ञानोपयोगेन ५०० छात्राणां निवासयोग्यं १६७ प्रकोष्ठोपेतं बृहद्भवनम् ३३ कक्ष्याप्रकोष्ठोपेतं शैक्षणिकभवनं च तथैव १.५० लक्षलीटर्परिमितजलस्य स्वच्छीकरणव्यवस्थां च लोकाय अचिरादेव समर्पयिष्यति इति समेषां मोदावहो विषयः ।





नवीनच्छात्रावासभवनचित्रम्



नवीनशैक्षणिकभवनचित्रम्



नवीनजलस्वच्छीकरणव्यवस्थाचित्रम्

# कुलपतिगीः



२०२० इति वर्षे विश्वविद्यालयं प्रति अनेकान् कार्यक्रमान् समानयत् । विशेषतया भगवतः श्रीवेङ्कटेशस्य कृपाविशेषेण सर्वेषां सहयोगेन च विद्यापीठमिदं राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन समग्रभारते मान्यतां प्राप्नोदिति अत्यन्तमहत्त्वपूर्णविषयोऽयं विश्वविद्यालयेतिहासे । २०२० वर्षे आधुनिकविषयानप्युद्बोधयितुम् अनुवादसंगीतादयो नवविभागा उदघाटिषत । प्राचीनेषु नवीनेषु च विभागेषु शैक्षणिकतदितराणि च द्विचत्वारिंशत्पदानि भारतस्य शिक्षामन्त्रालयद्वारा विश्वविद्यालयानुदानायोगद्वारा च अनुमतानि प्रापिषत । एच्.ई.एफ्.ए इत्यस्मात् १६७ प्रकोष्ठोपेतस्य ५०० छात्राणां वासयोग्यस्य भवनस्य तथा च ३३ कक्ष्याप्रकोष्ठयुक्तस्य संकुलस्य निर्माणार्थं ५८ कोटिपरिमितस्य धनराशिः न्यवेशि । सी.पि.डब्ल्यु.डि द्वारा आन्ध्रप्रदेशे इदंप्रथमतया अत्याधुनिकतन्त्रज्ञानस्योपयोगेन क्रियमाणमिदं भवनद्वयनिर्माणकार्यमचिरादेव समाप्तिमेष्यति । अनेन आगामिविंशतिवर्षपर्यन्तम् आवासकक्ष्याप्रकोष्ठानां न्यूनता न भविष्यति । एवमेव १.५० लक्षलीटर्परिमितजलस्य स्वच्छीकरणं विधाय विश्वविद्यालयपरिसरे विद्यमानानां समग्रवृक्षाणां सेचनव्यवस्थां कर्तुं १.५० कोटिपरिमितधनराशिः न्यवेश्यत । तत्कार्यमप्यचिरादेव सम्पत्स्यते । सम्प्रति विश्वविद्यालयपरिसरे सर्वत्र सीसीटीविच्छायाचित्रग्राहकमानकानि संस्थाप्यन्ते । बायोमेट्रिक् सिस्टम् अचिरादेव आरप्स्यते । प्रायः षण्मासाभ्यन्तरे विश्वविद्यालये सर्वत्र अन्तर्जालसम्पर्कसम्बद्धाः सर्वा अपि समस्या दूरीक्रियन्ते । ५०० छात्रैः युगपत् उपविश्य भोजनं कर्तुं समर्थस्य भोजनसभागारद्वयस्य निर्माणमचिरादेव भविष्यति । गुरुकुलपद्धत्या विविधशास्त्राणां शिक्षणम् अविलम्बमारप्स्यते । अधुना राष्ट्रियसंस्कृतविश्वविद्यालयस्य नवीनराज्याङ्गनिर्माणार्थं विशिष्टः प्रयत्नः विधीयते ।

सम्प्रत्याहत्य विश्वविद्यालयेन ७३ शिक्षकतत्सहयोगिकर्मकराणां नवनियुक्तयोऽकारिषत । नियुक्त्यवसरे आरक्षणव्यवस्थायां कामपि न्यूनतां विना एस्.सी., एस्.टी., ओबीसी इत्यादीनां समेषां पदानां नियमानुसारं पूर्णं विश्वविद्यालयेनाक्रियत । आरक्षणपदपूरणसन्दर्भे अन्येषां द्विचत्वारिंशतः विश्वविद्यालयानामपेक्षया अनेन विश्वविद्यालयेन आरक्षणनियमः सम्पूर्णतया पर्यपालीति पदपूरणपद्धतिं कोऽप्यधिकारी अवलोकयति चेत् कापि न्यूनता नोपलभ्यत इति कश्चन विशेषो वर्वर्ति ।

राष्ट्रियसंस्कृतविश्वविद्यालये २५ राज्येभ्यः छात्रा अधीयानास्सन्ति चेत् १८ राज्येभ्यः अध्यापकाः कार्यं कुर्वाणा विलसन्ति । अतो विश्वविद्यालयस्य वास्तविकतया राष्ट्रियत्वं सार्थकं समजनि । अत एतल्लघुभारतमेव परिगण्यते । यस्मिन् विश्वविद्यालये अस्माकं नियुक्तिः तदर्थमात्मावलोकनपूर्वकसमर्पणभाव आवश्यकः । विश्वविद्यालयेन मम कृते किमकारीत्यपेक्षया मया विश्वविद्यालयस्य कृते किमकारीति चिन्तयेयुः । यतो हि विश्वविद्यालयकारणेनैव अस्माकमस्तित्वं प्रतिष्ठा कुटुम्बपोषणं च ।

यस्मिन् कोरोनामहामारीसंकटकाले सर्वे विश्वविद्यालयाः स्तब्धा आसन् तदा अस्माकं विश्वविद्यालयः जागरूकस्सन् संकटकालमप्यवसरत्वेन परिकल्पयन् क्रमेण चत्वारिंशदधिकान् अभ्यासक्रमान् समानैषीत् । एप्रिल्मासतः अद्य यावत् अन्तर्जालमाध्यमेन ४२०० छात्राः १७ देशेभ्यः विविधपदविकापाठ्यक्रमानाधृत्य विद्याग्रहणं कुर्वन्तस्सन्तीति अन्येभ्यो विशिनष्ट्ययं विश्वविद्यालयः । एवं विश्वविद्यालयस्य सर्वतो विकासे कर्मकराणां समेषां विश्वविद्यालयं प्रति आत्मावलोकनेन सह समर्पणभाव आवश्यक इति एतद्द्वारा सविनयं निवेद्यते ।



(आचार्यः वि. मुरलीधरशर्मा)

# कोरोनासंकष्टकाले सर्वासु शिक्षणसंस्थासु स्तब्धासु राष्ट्रियसंस्कृतविश्वविद्यालयेन नैकेषाम् अन्तर्जालीयपाठ्यक्रमाणां सफलम् आयोजनम्

भारतीयसंस्कृतेः सभ्यतायाः प्रतिष्ठाकारकाणि भवन्ति संस्कृतभाषा संस्कृतस्य शास्त्राणि च । विभिनन्नविपत्सु इमानि विश्वस्य मार्गदर्शकानि आसन् सन्त्यपि । अत एव विश्वस्तरे अधुनापि बहवः संस्कृतमध्येतुमिच्छन्ति । तेषामिच्छां पूरयितुं राष्ट्रियसंस्कृतविश्वविद्यालयः वर्षेऽस्मिन् एप्रिलमासात् आरभ्य विभिन्नान् अध्यन्तर्जालपाठ्यक्रमान् (Online Programs) समारचयत् । करोनासङ्कटकाले सर्वमपि विश्वं स्थगितम् । तथापि विश्वविद्यालयस्य पठनपाठनकार्याणि सांस्कृतसेवाकार्याणि च न स्थगितानि । तत्रेदमेवोदाहरणम् विश्वस्य उपचतुस्सहस्रम् (4000) शिक्षार्थिनः विश्वस्य नैकेभ्यः राष्ट्रेभ्यः संस्कृतभाषां शास्त्राणि च अधीयते अस्माद्विश्वविद्यालयात् ।

## प्रथमचरणम्

विश्वविद्यालयेन करोनानिर्बन्धस्य प्रथमचरणे 20 संख्याकाः अल्पावधिपाठ्यक्रमाः एप्रिल-मेमासयोः समायोजिताः । तत्र 1193 शिक्षार्थिनः भागमवहन् । तस्य विवरणं यथा –

| क्र.सं | विषयः /पाठ्यक्रमः | समन्वयकः/ अध्यापकः | छात्रसंख्या |
|---|---|---|---|
| 1. | विवेकचूडामणिः | आचार्यः एम्. एल्. एन् मूर्तिः | 63 |
| 2. | सत्प्रतिपक्षशतकोक्तिः | आचार्यः ओ. रामलालशर्मा | 03 |
| 3. | अद्वैतसिद्धिः | आचार्यः ओ. रामलालशर्मा | 05 |
| 4. | साख्यकारिका, अर्थसङ्ग्रहश्च | आचार्यः ओ. रामलालशर्मा | 01 |
| 5. | न्यायसिद्धान्तमुक्तावलिः - दिनकरीसहिता | आचार्यः ओ. रामलालशर्मा | 06 |
| 6. | वेदान्तपरिभाषा | आचार्यः कु. विश्वनाथः | 04 |
| 7. | बृहदारण्यकोपनिषत् | आचार्यः कु. विश्वनाथः | 06 |
| 8. | ब्रह्मसूत्रभाष्यम्- चतुर्थोऽध्यायः | आचार्यः कु. विश्वनाथः | 05 |
| 9. | व्युत्पत्तिवादः | आचार्यः कु. विश्वनाथः | 01 |
| 10. | न्यायसिद्धान्तमुक्तावलिः - दिनकरीसहिता | आचार्यः कु. विश्वनाथः | 02 |
| 11. | नव्यन्यायभाषाप्रदीपः (Introduction to Navya Nyaya) | डा. ओ. जि. पि. कल्याणशास्त्री | 03 |
| 12. | लघुकौमुदी (पञ्चसन्ध्यन्तम्) | डा. ओ. जि. पि. कल्याणशास्त्री | 02 |
| 13. | सिद्धान्तकौमुदी (पञ्चसन्ध्यन्तम्) | डा. पङ्कजव्यासः | 70 |
| 14. | रघुवंशम् | डा. शिवरामभट्टः | 75 |
| 15. | रघुवंशम् | डा. भारतभूषणरथः | 06 |
| 16. | स्वरकल्पाना 1 | डा. वै. बालसुब्रह्मण्यम् | 72 |

| | | | |
|---|---|---|---|
| 17. | Yoga for Effective Prevention of CORONA and Improve the Immune System - | | |
| | 1. | डा. आर् लक्ष्मीनारायणः | 105 |
| | 2. | डा. के. सि. एस्, लोकेश्वरः | |
| | 3. | डा टि. शिवकुमारः | |
| | 4. | श्री राहुलकुमार शर्मा | |
| | 5. | श्रीमती ई. पि. नागलक्ष्मी | |
| | 6. | श्री अजयकुमारः | |
| | 7. | श्री वी गोवर्धनरेड्डी | |
| 18. | व्याकरणशास्त्रप्रवेशः | डा.के शिवकुमारी | 120 |
| 19. | सरलसंस्कृतम् (Simple Sanskrit) | | 355 |
| | १. | डा. नन्दनभट्टः | |
| | २. | डा. सो.ल. सीताराम शर्मा | |
| | ३. | डा. कुमारः बागेवाडीमठः | |
| | ४. | श्री रागि वेङ्कटाचार्यः | |
| | ५. | श्री परमेश्वरः | |
| | ६. | श्री किरणभट्टः | |
| 20. | व्यावहारिकसंस्कृतम् (Functional Sanskrit) | | 289 |
| | | **आहत्य छात्रसंख्या** | **1193** |

अन्तर्जालद्वारा संचालितानां विंशतेः अभ्यासक्रमाणां प्रथमचरणे आहत्य ११९३ छात्राः विश्वविद्यालयादध्ययनम् अकार्षुः इति विद्यापरम्परायाः अविच्छिन्नता अस्मिन् संकष्टकालेऽपि अवालोक्यत ।






## द्वितीयचरणम्

विश्वस्य नानादिग्भ्यः संस्कृताध्येतॄणाम् अपेक्षानुसारं जूनमासतः विभिन्नेषु शास्त्रीयेषु आधुनिकेषु च विषयेषु अल्पावधिप्रमाणपत्रीयपाठ्यक्रमाः समारचिताः। एते पाठ्यक्रमाः सेप्तेम्बरमासं यावत् सञ्चालिताः। एतेषां पाठ्यक्रमाणां विवरणं यथा-

| क्र.सं | पाठ्यक्रमस्य नाम | समन्वयकः / अध्यापकः | छात्राः |
|---|---|---|---|
| 1. | प्रायोगिकसंस्कृतम् (Basic Functional Sanksrit) | 1. डा. नन्दनभट्टः<br>2. डा. सो.ल. सीतारामशर्मा<br>3. डा. कुमारः बागेवाडीमठः<br>4. श्री रागि वेङ्कटाचार्यः<br>5. श्री परमेश्वरः<br>6. श्री किरणभट्टः | 222 |
| 2. | प्रगत-प्रायोगिकसंस्कृतम् (Advanced Functional Sanskrit) | 1. डा. नन्दनभट्टः<br>2. डा. सो.ल. सीतारामशर्मा<br>3. डा. कुमारः बागेवाडीमठः<br>4. श्री रागि वेङ्कटाचार्यः | 153 |
| 3. | व्याकरणशास्त्रप्रवेशः (Vyakarana Shastra Pravesha) | डा. के. शिवकुमारी | 132 |
| 4. | स्वरकल्पना 1 Svara Kalpana Level – 1 (June) | डा. वै. बालसुब्रह्मण्यम् | 40 |
| 5. | स्वरकल्पना 1 Svara Kalpana Level-1 (Apr & May) | डा. वै. बालसुब्रह्मण्यम् | 40 |
| 6. | स्वरकल्पना 2 Svara Kalpana Level – 2 | डा. वै. बालसुब्रह्मण्यम् | 40 |
| 7. | नव्यन्यायः (Navya Nyaya) - | डा. ओ.जि.पि. कल्याणशास्त्री | 36 |
| 8. | सांख्यकारिका (Sankhya Karika) | आचार्यः कु. विश्वनाथः | 25 |
| 9. | क्रियायोगः 1 Traditional Yoga Level-1 (Jun 2020) | 1. डा. आर् लक्ष्मीनारायणः<br>2. डा. के. सि. एस्, लोकेश्वरः<br>3. डा टि. शिवकुमारः | 222 |

| | | | |
|---|---|---|---|
| | 4. श्री राहुलकुमार शर्मा | | |
| | 5. श्रीमती ई. पि. नागलक्ष्मी | | |
| | 6. श्री अजयकुमारः | | |
| | 7. श्री वी गोवर्धनरेड्डी | | |
| 10. | क्रियायोगः 1 | Traditional Yoga Level -1 (Jul 2020) | 84 |
| 11. | क्रियायोगः 2 | Kriya Yoga Level -2 (July, 2020) | 100 |
| 12. | क्रियायोगः 1 | Traditional Yoga Level-1 (Aug, 2020) | 105 |
| 13. | ज्यौतिषम् (Jyotisha) | | 52 |
| | 1. डा. कृष्णकुमारभार्गवः | | |
| | 2. डा चित्तरञ्जननायकः | | |
| | 3. डा. धर्मदासन् | | |
| 14. | रघुवंशम् (Raghuvamsam) | | 28 |
| | डा. शिवरामभट्टः | | |
| 15. | विवेकचूडामणिः (Vivekachudamani) | | |
| | आचार्यः एम्.एल्.एन् मूर्तिः | | 211 |
| 16. | सिद्धान्तकौमुदी (Siddhantakaumudi) | | |
| | डा. पङ्ककुमारजव्यासः | | 295 |
| | | **Total** | **1785** |



रघुवंशपाठ्यक्रमे समवेताः देशविदेशच्छात्राः



न्यायपाठ्यक्रमे समवेताः देशविदेशच्छात्राः

## तृतीयचरणम्

जूलैमासात् विश्वविद्यालयोन प्रमाणपत्रपाठ्यक्रमाः, डिप्लोमापाठ्यक्रमाः, अड्वान्सडडिप्लोमापाठ्यक्रमाः सञ्चाल्यन्ते । तेषां विवरणं यथा -

| क्र.सं | पाठ्यक्रमस्य नाम | समन्वयकः / अध्यापकः | छात्राः |
|---|---|---|---|
| 1. | द्वैतवेदान्ते प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Dvaita Vedanta) | डा. नारायणपूजारः | 52 |
| 2. | द्वैतवेदान्ते डिप्लोमापाठ्यक्रमः (Diploma Programme in Dvaita Vedanta) | डा. नारायणपूजारः | 10 |
| 3. | द्वैतवेदान्ते अड्वान्स्ड्डिप्लोमापाठ्यक्रमः (Advanced Diploma Programme in Dvaita Vedanta) | डा. नारायणपूजारः | 04 |
| 4. | भारतीयदर्शनानाम् आधाराः (Fundamentals of Indian Philosophy) | 1. आचार्यः राणी सदाशिवमूर्तिः<br>2. डा. श्रीनिवास कृष्ण रेड्डी | 84 |
| 5. | Certificate Program in Sitar | डा. हंस प्रभाकर रविदासः | 13 |
| 6. | प्रबोधम् - प्रमाणपत्रपाठ्यक्रमः (Probodham-Certificate Program(Telugu) | डा. जि. लक्ष्मीनारायणः | 21 |
| 7. | बालगोकुलम् (Bala Gokulam) | श्री किरणभट्टः | 175 |
| 8. | कारके प्रणाणपत्रपाठ्यक्रमः (Certificate Program in Karakam) | डा. शिवरामभट्टः<br>डा. के. शिवकुमारी | 19 |
| 9. | व्याकरणशास्त्रप्रवेशः – प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Vyakarana Shastra Pravesha) | डा. के. शिवकुमारी | 32 |
| 10. | ज्यौतिषे प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Jyotisha) | 1. डा. कृष्णकुमारभार्गवः<br>2. डा चित्तरञ्जननायकः<br>3. डा. धर्मदासन्<br>4. डा. केशवमिश्रः | 86 |
| 11. | वास्तुशास्त्रे प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Vaastu) | | 48 |

12. न्यायशास्त्रे प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Nyaya) 20

डा. उदयन हेगडे

13. क्रियायोगे प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Traditional Kriya Yoga) 100

1. डा. आर् लक्ष्मीनारायणः
2. डा. के. सि. एस्, लोकेश्वरः
3. डा टि. शिवकुमारः
4. श्री राहुलकुमारशर्मा
5. श्रीमती ई. पि. नागलक्ष्मीः
6. श्री अजयकुमारः
7. श्री वी गोवर्धनरेड्डी

14. मनोधर्मसंगीते प्रमाणपत्रपाठ्यक्रमः (Certificate Program Manodharma Sangeetam) 25

डा. वै. बालसुब्रह्मण्यम्

15. प्रायोगिकसंस्कृते प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Functional Sanskrit) 149

1. डा. नन्दनभट्टः
2. डा. सो.ल. सीताराम शर्मा
3. डा. कुमारः बागेवाडीमठः
4. श्री रागि वेङ्कटाचार्यः
5. श्री परमेश्वरः
6. श्री किरणभट्टः
7. श्री समीर साहा

16. प्रायोगिकसंस्कृते डिप्लोमापाठ्यक्रमः (Diploma Program in Functional Sanskrit) 163

17. व्याकरणशास्त्रप्रवेशः - डिप्लोमापाठ्यक्रमः (Diploma Program in Applied Grammar) 79

डा. के. शिवकुमारी

18. संस्कृतसाहित्ये अड्वान्सड्डिप्लोमापाठ्यक्रमाः
(Advanced Diploma In Sanskrit Sahitya) 65

1. आचार्यः जि.एस्. आर्. कृष्णमूर्तिः
2. आचार्यः राणी सदाशिवमूर्तिः
3. डा. भारतभूषणरथः
4. डा. मुनुकुट्ल सुजाता

19. भारतीयगणिते डिप्लोपाठ्यक्रमः (Diploma Program in Indian Mathematics) 52

1. डा.सो.ल.सीतारामशर्मा(समन्वयकः)

2. डा. वाणिश्रीभट्टः
3. श्री तेजस कुलकर्णी

20. संस्कृतविनोदः- प्रमाणपत्रपाठ्यक्रमः (Samskrita Vinoda -Certificate Program) 24
आचार्यः जि. शङ्करनारायणन्

21. Certificate Program in Yoga & Stress Management 56
1. डा. आर्. लक्ष्मीनारायणः
2. सुश्रीः एस्. वैष्णवी

22. अद्वैतवेदान्ते प्रमाणपत्रपाठ्यक्रमः (Certificate Program in Adwaita Vedanta) 32
1. डा. श्रीहरिः धायदुडे

23. Certificate Program in Research Methodology in Sanskrit Education 21
1. आचार्या के. कादम्बनी
2. आचार्यः राधागोविन्दत्रिपाठी
3. सुश्रीः एस्. वैष्णवी

**Total 1326**

इत्थं चरणत्रये आहत्य ४३०४ अध्येतारः विश्वविद्यालयस्य विविधपाठ्यक्रमेषु अन्तर्जालमाध्यमेन अधीयानाः सन्तीति अस्मिन् कोरोनामहामारीसंकष्टकाले सर्वासु शिक्षणसंस्थासु स्तब्धासु सतीषु राष्ट्रियसंस्कृतविश्वविद्यालयः जागरूकस्सन् ५९ पाठ्यक्रमान् निर्माय देशविदेशच्छात्राणाम् आकर्षणकेन्द्रं समभूदिति अन्याभ्यो विशिनष्टि ।







**बालगोकुलच्छात्राः**







## वृत्तपरिस्पन्दः

THE NEW INDIAN EXPRESS

NATION WORLD STATES CITIES BUSINESS SPORT GOOD NEWS MOVIES GALLERIES

STOCK MARKET BSE 50405.32 ▼ -440.76(-0.87%) NSE 14938.10

Home › States › Andhra Pradesh

### Tirupati's 'National Sanskrit University' online courses evoke positive response from students

*As many as 414 students from India and abroad have evinced interest in pursuing the NSU online courses so far.*

### Sanskrit University to offer several diploma and certificate programmes

*Continued from Page 1*

Around 3,000 candidates, including those from the UK, USA, Singapore, Australia, Abu Dhabi, Sri Lanka and other countries, pursued the courses. Responding to an appeal by the candidates to continue the online courses, the NSU has come up with 22 certificate programmes of three months duration.

As many as 1,927 candidates enrolled themselves for the certificate courses held from June to August. The candidates who pursued the courses, include IT professionals, Chartered Accountants, judicial and administrative staff. The NSU also conducted a special programme Bala Gokulam of one month duration in July for high school students. In all, 54 students from 14 countries attended the programme.

"We are going to introduce certificate programmes in Samskrita Vinodah, Research Methodology in Sanskrit Education, Yoga and Stress Management and Indian Mathematics this academic year. Students and people from different professions can pursue the courses," said NSU Vice-Chancellor V Muralidhara Sarma.

The university will offer study material to students in the form of PPTs. The e-content for the certificate programmes will be provided to students free of cost.

**NSU courses**

The National Sanskrit University (NSU) has invited applications from students for various diploma and certificate programmes for the academic year 2020-21.

They include Advanced Diploma Programme in Sanskrit Satiya (one year), Diploma Programme in Functional Sanskrit (one year), Diploma Programme in Vykarana Shastra Pravesh (one year), Certificate Programme in Karaka (6 months), Certificate Programme in Vyakarana Shastra Pravesha (6 months), Certificate Programme in Functional Sanskrit (6 months), Certificate Programme in Functional Jyotisha (6 months), Certificate Programme in Vaastu (6 months), Certificate Programme in Nyaya (6 months), Certificate Programme in Traditional Kriya Yoga (6 months) and Certificate Programme in Manodharma Sangeetham (6 months).

### సంస్కృత విశ్వవిద్యాలయంలో ఆన్‌లైన్ కోర్సులు

**సర్టిఫికెట్ ప్రోగ్రామ్ ఇన్ సంస్కృత వినోద**
రిజిస్ట్రేషన్ ఫీజు: రూ.3,000 (విదేశీ విద్యార్థులకు 100 డాలర్లు)
ఈ మెయిల్: sankarankanchi@nsktu.org
రిజిస్ట్రేషన్ లింక్: https://forms.gle/wGv54j9CvPf2KhYN6

**యోగా అండ్ స్ట్రెస్ మేనేజ్‌మెంట్‌లో సర్టిఫికెట్ ప్రోగ్రామ్**
రిజిస్ట్రేషన్ ఫీజు: రూ.8,000 (విదేశీ విద్యార్థులకు 220 డాలర్లు)
ఈమెయిల్: rapurulakshmi.yoga@gmail.com
రిజిస్ట్రేషన్ లింక్: https://forms.gle/4LCu51DNUVny4xaF6

**అద్వైత వేదాంతంలో సర్టిఫికెట్ ప్రోగ్రామ్**
రిజిస్ట్రేషన్ ఫీజు: రూ.3,000 (విదేశీ విద్యార్థులకు 100 డాలర్లు)
ఈ మెయిల్: shreehari.dhaygude@gmail.com
రిజిస్ట్రేషన్ లింక్: https://forms.gle/RVJQbCSZEQBMHEBN8

**రీసెర్చ్ మెథడాలజీలో సర్టిఫికెట్ కోర్సు**
రిజిస్ట్రేషన్ ఫీజు: టీచర్లకు రూ.4,000, ఎంఎడ్, ఎంఫిల్, పీహెచ్‌డీ విద్యార్థులకు రూ.3,000 (విదేశీ విద్యార్థులకు 100 డాలర్లు)
ఈ మెయిల్: kadambiniseshu@gmail.com
రిజిస్ట్రేషన్ లింక్: https://forms.gle/jeGRu82X6f35GnKM8

**భారతీయ గణితంలో డిప్లొమా**
ఈ ప్రోగ్రామ్ వ్యవధి: ఏడాది • రిజిస్ట్రేషన్ ఫీజు: రూ.4500 (విదేశీ విద్యార్థులకు 150 డాలర్లు)
ఈ మెయిల్: vanimanju2020@gmail.com
రిజిస్ట్రేషన్ లింక్: https://forms.gle/D3qpfC4RKm6yg9bC7

### SANSKRIT VARSITY ONLINE COURSES A BIG DRAW

D SURENDRA KUMAR @Tirupati

THE online certificate courses introduced by the National Sanskrit University (NSU), Tirupati have evoked a good response from students. As many as 414 students from India and abroad have evinced interest in pursuing the NSU online courses so far. The foreign students who applied for the courses, hail from Sri Lanka, Australia, Singapore, USA and Arab countries.

It may be noted here that the Government of India released a gazette notification on March 25 this year, upgrading Rashtriya Sanskrit Vidyapeetha (RSVP), Tirupati, as National Sanskrit University (Central University).

The NSU conducted Sanskrit and Yoga courses in 19 streams through online from April 5 to May 17 this year in view of the Covid-19 pandemic. P5

# अन्तर्दौवारिकक्रीडास्पर्धाः

## दिनाङ्कः - १४.०३.२०२०

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य सुदृढभारताभियानम् इत्युपक्रमान्तर्गतत्वेन राष्ट्रियसंस्कृतविद्यापीठे १४.०३.२०२० दिनाङ्के छात्रेभ्यः अध्यापकेभ्यः अध्यापकसहकर्मचारिभ्यश्च अन्तर्दौवारिकक्रीडास्पर्धाः समायोज्यन्त । मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः कार्यक्रमस्य उद्घाटनं विधाय शारीरिकमानसिकस्वास्थ्याय अन्तर्दौवारिकक्रीडानां महन्महत्त्वं प्रत्यपादयन् । शारीरिकविभागस्य सहायकनिर्देशकः श्रीमान् सेतुराममहोदयः क्रीडानां स्वास्थ्यस्य शारीरिकसुदृढतायाश्च संक्षिप्तविवरणं प्रदाय इतिहासमप्यवोचत् । अस्मिन् कार्यक्रमे छात्राः अध्यापकाः शिक्षकसहकर्मचारिणश्च सहभागं स्व्यकार्षुः । सुदृढभारताभियानान्तर्गतः तया छात्रैः अध्यापकैः शिक्षकसहकर्मचारिभिश्च अनेकाः अन्तर्दौवारिकक्रीडाः अक्रीड्यन्त ।










## वृत्तपरिस्पन्दः






శారీరక, మానసిక దృఢత్వానికి క్రీడలు

యూనివర్సిటీ క్యాంపస్: శారీరక, మానసిక దృఢత్వానికి క్రీడలు ఎంతగానో ఉపకరిస్తాయని రాష్ట్రీయ సంస్కృత విద్యాపీఠం ఉపకులపతి వి.మురళీధరశర్మ అన్నారు. శనివారం విద్యాపీఠంలోని ఇండోర్ స్టేడియంలో విద్యార్థులు, అధ్యాపకులకు క్రీడా పోటీలు నిర్వహించారు. ఈ పోటీలను వీసీ ప్రారంభించి మాట్లాడారు. ఫిజికల్ ఫిట్‌నెస్ కోసం ఏమేం చేయాలో వ్యాయామ విభాగం అసిస్టెంట్ డైరెక్టర్ వి.సేతురామ్ వివరించారు. వైష్ణవి కో-ఆర్డినేటర్‌గా వ్యవహరించారు. కార్యక్రమంలో ప్రొఫెసర్ ఆర్.జోషి, రాధాగోవిందన్ త్రిపాఠి, డి.జ్యోతి, వై.విజయలక్ష్మి, లీనాచంద్ర, మారవరాపు పాల్గొన్నారు.

రన్నింగ్ చేస్తున్న విద్యార్థులు



విద్యాపీఠం ఇండోర్ స్టేడియంలో క్రీడలు ప్రారంభం

# राष्ट्रियसंस्कृतविद्यापीठमधुना राष्ट्रियसंस्कृतविश्वविद्यालयः

समेषां विद्यापीठस्य कर्मचारिणां

कृते महतस्सन्तोषस्य विषयोऽयं यत् अस्माकं राष्ट्रियसंस्कृतविद्यापीठमिदं **राष्ट्रियसंस्कृतविश्वविद्यालयः** इति भारतस्य महामहिमशालिभिः राष्ट्रपतिवर्यैः श्रीरामनाथकोविन्दमहोदयैः १६.०३.२०२० दिनाङ्के प्राकट्यत। इदमस्माकं परमादरणीयानां प्रशासनकुशलानां संस्थायाः प्रगतौ कटिबद्धानाम् अहर्निशं विद्यापीठयशप्रसे प्रयतमानानां मान्यानां कुलपतीनाम् **आचार्याणां वि. मुरलीधरशर्ममहोदयानाम्** अनवरतप्रयासस्य एवम् अस्मत्कुलाधिपतीनां श्रीमतां पद्मभूषणभूषितानां **नीडामङ्गलंगोपालस्वामिमहोदयानां** मार्गदर्शनस्य च फलरूपं वर्वर्ति। विद्यापीठस्य केन्द्रीयविश्वविद्यालयत्वेन परिणामे भारतस्य संसदि प्रस्तावं विधाय सफलवादम् उपस्थापितवन्तः मानवसंसाधनविकासमन्त्रालयस्य मान्याः मन्त्रिणः संस्कृतानुरागिणः श्रीमन्तः **डा. रमेशपोखरियालनिशङ्कशमहोदयाः** नितरां धन्यवादार्हाः।




**तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन उद्घोषणानन्तरम् एतद्विकसनशुभसन्दर्भमुपलक्ष्य अस्माकं कुलपतीनाम् आध्वर्यवे समेषां वेदविदुषां शास्त्रविदुषां पण्डितानाम् अध्यापकानां छात्राणां चोपस्थितौ अखण्डविष्णुसहस्रनामपारायणं चण्डीयागश्च समाचर्यत।**















राष्ट्रियसंस्कृतविश्वविद्यालयत्वेन उद्घोषणसन्दर्भे अखण्डविष्णुसहस्रनामपारायणं कुर्वन्तः छात्रा अध्यापकाश्च

# कुलपतिमहोदयानां व्याख्यानम्




**दिनाङ्कः - २७.०४.२०२०**

संस्कृतस्य प्रचाराय प्रसाराय च नैकेभ्यः वर्षेभ्यः अनवरतं कार्यं कुर्वाणया संस्कृतभारत्या २७.०४.२०२० दिनाङ्के अन्तर्जालामुखपटलद्वारा समायोजितायां व्याख्यानमालायाम् अस्माकं विश्वविद्यालयस्य परमादरणीयाः प्रसिद्धशिक्षामनोवैज्ञानिकाः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः "भारतीयमनोविज्ञानम्"** इति विषयमाधृत्य मुख्यवक्तृत्वेन समुपस्थाय द्विशताधिकान् श्रोतॄन् स्वामूल्यव्याख्यानेन समतोषयन्।

# कुलपतिमहोदयानां व्याख्यानम्




## दिनाङ्कः - १५.०५.२०२०

संस्कृतस्य प्रचाराय प्रसाराय च नैकेभ्यः वर्षेभ्यः अनवरतं कार्यं कुर्वाणया आन्ध्रप्रदेशराज्यस्य संस्कृतभारत्या १५.०५.२०२० दिनाङ्के अन्तर्जालामुखपटलद्वारा समायोजितायां व्याख्यानमालायाम् अस्माकं विश्वविद्यालयस्य परमादरणीयाः प्रसिद्धशिक्षाविदः मनोवैज्ञानिकाश्च कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः "संस्कृते विज्ञानम्"** इति विषयमाधृत्य मुख्यवक्तृत्वेन समुपस्थाय शताधिकान् श्रोतृन् स्वामूल्यत् व्याख्यानेन समतोषयन्।

# शास्त्ररत्नाकरपुरस्कारः पण्डितरत्नपुरस्कारश्च



श्रीमते रामानुजाय नमः ।

जगदाचार्य-भगवद्रामानुजाचार्यवर्यैः
संस्थापित-चतुस्सप्तति(७४)सिंहासनेषु सुप्रसिद्धम् आनुवंशिकं

श्रीमदनन्तानूपिळ्ळै-तिरुमलपीटम् ॥

अन्तर्वेदिस्वामिनिलयम्, ३-१-११८, अम्बासत्रं वीथी, भद्राचलम्-५०७१११ (तेलंगाणा)

श्रीश्रीश्रीभद्राचलदिव्यक्षेत्राविर्भूत-सीतारामचन्द्रस्वामिनां मङ्गलाशासनपूर्वकदिव्यानुग्रहेण

स्वस्ति श्रीशार्वरिनामसंवत्सर-ज्येष्ठशुद्धपञ्चमी-पुष्यमीनक्षत्रयुक्त-सौम्यवासरे (दिनाङ्कः २७-५-२०२०)
अस्मत्पितामहानां श्रीमद्वेङ्कटरङ्गाचार्याणां तिरुनक्षत्रसन्दर्भे प्रचालिते सदसि
स्वयमाचार्यपरम्परानुगत-श्रीमदुभयवेदान्तप्रवर्तकाचार्याणां भारद्वाजगोत्रोत्पन्नानाम् आन्ध्रनम्माळ्वार्-विरुदभाजां
श्रीमतां पालवञ्च-तिरुमल-गुदिमेळ्ळ-वेङ्कटलक्ष्मीनृसिंहाचार्याणां ज्येष्ठपुत्राय,

उभयवेदान्तप्रवर्तकाचार्य-चतुश्शास्त्रशिरोमणि-शास्त्ररत्नाकर-महामहोपाध्याय-
भारतराष्ट्रपतिसम्मानपुरस्कृत-पद्मभूषणसभाजित-प्रेञ्चूसर्वकारीयात्युन्नतषावलियर्-विरुदसम्मानित-
श्रीनावल्पाक्कं शठकोप-रामानुजताताचार्याणां शिष्यपरमाणवे,

न्याय-व्याकरण-वेदान्त-पाञ्चरात्र-द्रविडागमशास्त्रेषु कृतभूरिपरिश्रमाय,
अप्रकाशितप्राचीनबहुशास्त्रग्रन्थसंशोधकप्रकाशकाय, षड्भाषनिष्णाताय,
तिरुपतिस्थ-राष्ट्रियसंस्कृतविश्वविद्यालये न्यायविभागे आचार्यपदविभूषिताय,
न्यायशास्त्रविभागाध्यक्षाय, परीक्षानियन्त्रकचराय, हस्तलिखिततालपत्रग्रन्थसंशोधनधुरन्धराय,
सद्गुणकतन्त्रज्ञाय, बहुमुखप्रज्ञाशालिने,
आचार्य-पालवञ्च-तिरुमल-गुदिमेळ्ळ-यतिराजसम्पत्कुमाराचार्यमहोदयाय

**शास्त्ररत्नाकरः**

इति विरुदं प्रदाय सभाजयितुम् अत्यन्तं मोमुद्यते नश्चेतः ॥

॥ मङ्गलं महत् ॥

दिनाङ्कः
२७-५-२०२०

अध्यक्षः
श्रीमत्तिरुमल-गुदिमेळ्ळ-श्रीमन्नारायणाचार्यः
अन्तर्वेदिस्वामिनिलयम्, भद्राचलम् ।



Estd.:1979
श्रीः
"तमसो मा ज्योतिर्गमय"
Ph: Office: 0877 - 2239992
Mobile: 9908537528

**NAVAJEEVAN BLIND RELIEF CENTRE**
(FREE HOME FOR THE BLIND, ORPHAN AND AGED)
TIRUCHANOOR, TIRUPATI - 517 503, A.P.
Email: sreenavajeevan@gmail.com
Website: www.navajeevan.org
K. Sridhar Acharya
Founder / President

**CERTIFICATE OF HONOUR**

The President and members of this centre are cordially congratulate and Honor

**Prof. PTGY. Sampath Kumaracharyulu**
Professor & Head, Department of Nyaya Philosophy,
NATIONAL SANSKRIT UNIVERSITY, TIRUPATI (A.P.)

on the auspicious occasion of his 60th age with the certificate presenting the Award entitled

**"PANDITARATNA"**

*for his National and Inter-National level reputation, scholarship, commitment and promotion towards the traditional Sastra-s i.e. Nyaya, Vyakarana, Visistadvaita Vedanta, Pancharatra Agama and Dravidaveda/ Divyaprabandha & for the distinguished and Outstanding services to the Society by his hundreds of Lectures in Dharmapracharaparishad, Alwar Divyaprabandha Project, Sweta, SVBC and others.*

DATE : 21-05-2020
PLACE: Tirupati

Dr. K. SRIDHAR ACHARYA
[Founder / President]

Contributions to Navajeevan Blind Relief Centre, TIRUPATI are eligible for Tax Relief U/S 80 G of Income Tax Act 1961

अस्माकं विश्वविद्यालयस्य न्यायविभागस्य आचार्याः विभागप्रमुखाश्च **डा. पा.ति.गु.य. सम्पत्कुमाराचार्युलुमहोदयाः** तेलङ्गानास्थश्रीमदनन्तान्पिळ्ळै तिरुमलपीठेन **शास्त्ररत्नाकर** इति Navajeevan Blind Relief Centre, Tirupati इत्यनेन **पण्डितरत्नम्** इति पुरस्कारेण सभाजिता इति शेमुषीपक्षतः विश्वविद्यालयपक्षतश्च तेभ्यो हार्दान्यभिनन्दनकुसुमानि ।



## सेवानिवृत्ता आचार्याः

अस्मकं विश्वविद्यालयस्य व्याकरणविभागस्य **आचार्याः जानमद्दिरामकृष्णमहोदयाः** विश्वविद्यालये स्वकीयदीर्घसेवातः २०२० एप्रिल्मासे निवृत्ताः ।
तान् सम्मानयन्तः अस्माकं कुलपतयः ।

# एकदिना राष्ट्रियसंगोष्ठी - महापारिषदम्

## दिनाङ्कः - ०१.०६.२०२०




राष्ट्रियसंस्कृतविश्वविद्यालयस्य न्यायविभागेन ०१.०६.२०२० दिनाङ्के महापारिषदान्तर्गतत्वेन **दर्शनेषु चत्वारो व्यूहाः** इति विषये एकदिनात्मिका अन्तर्जालीया राष्ट्रियसंगोष्ठी समायोज्यत। अस्यां संगोष्ठ्यां देशस्य विविधाः दर्शनशास्त्रनिष्णाताः प्रथितयशस्काः विद्वांसः स्वकीयविचारान् प्रास्तोषत। शताधिकाः ज्ञानपिपासवः छात्राः शोधछात्राश्च कार्यक्रमेऽस्मिन् समवेता आसन्। वैदिकप्रार्थनापरिचयाभ्यां कार्यक्रमोऽयमारब्धः। विश्वविद्यालयस्य शैक्षिकसंकायप्रमुखाः **आचार्याः राणी सदाशिवमूर्तिमहोदयाः** समागतानां समेषां स्वागतं व्यधुः। संगोष्ठ्या अस्या आध्यक्ष्यं विश्वविद्यालयस्य मान्याः कुलपतयः **आचार्याः वि. मुरलीधर-शर्ममहोदयाः** निरवाक्षुः। राजमहेन्द्रवरे गौतमीसंस्कृतविद्यापीठस्य प्राचार्यचराः **आचार्याः म.म.वि.गोपालकृष्णशास्त्रिणः** समन्वयभाषणं अकृषत। सम्पूर्नानन्दसंस्कृतविश्वविद्यालयस्य कुलपतयः **आचार्याः राजारामशुक्लमहोदयाः** न्यायवैशेषिकयोः चत्वारो व्यूहाः इति विषयमधिकृत्य स्वविचारं प्रास्तुवन्। राष्ट्रियसंस्कृतविश्वविद्यालयस्य न्यायविभागस्य **आचार्याः के. विश्वनाथमहोदयाः** सांख्ययोगदर्शनयोः चत्वारो व्यूहाः इति विषयमाधृत्य स्वमतमुपास्थापयन्।

मद्रासंस्कृतकलाशालायाः मीमांसाविभागस्य **आचार्याः म.म.मणिद्राविडशास्त्रिमहोदयाः** मीमांसादर्शने चत्वारो व्यूहाः इति विषये स्वकीयमभिप्रायं प्राचीकशन्। कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलगुरवः **आचार्याः श्रीनिवासवरखेडिमहोदयाः** द्वैतदर्शने चत्वारो व्यूहाः इति विषयमधिकृत्य व्याख्यानमकार्षुः। राष्ट्रियसंस्कृतविश्वविद्यालयस्य विशिष्टाद्वैतवेदान्तविभागस्य **आचार्याः का.ई. देवनाथन्महोदयाः** विशिष्टाद्वैतदर्शने चत्वारो व्यूहा इति विषयमाधृत्य स्वविचारान् प्रास्ताविषुः। राष्ट्रियसंस्कृतविश्वविद्यालयस्य अद्वैतवेदान्तविभागस्य **आचार्याः एम्.एल्.नरसिंहमूर्तिमहोदयाः** अद्वैतदर्शने चत्वारो व्यूहा इति विषये स्वकीयं प्रतिपाद्यम् उपास्थापयन्। इत्थं विविधदर्शनानुसारं विद्वत्तल्लजानां ज्ञानपूर्णव्याख्यानेन संगोष्ठीयं समपद्यत।

-----------------------

# एकदिना अन्ताराष्ट्रियसंगोष्ठी - संस्कृतानुसन्धानपद्धतिः

## दिनाङ्कः - ०२.०६.२०२०

राष्ट्रियसंस्कृतविश्वविद्यालयस्य अनुसन्धानप्रकाशनविभागेन ०२.०६.२०२० दिनाङ्के संस्कृतानुसन्धानपद्धतिः इति शीर्षकोपेता एकदिनात्मिका अन्तर्जालीया अन्ताराष्ट्रिया संगोष्ठी समायोज्यत। अस्मिन् कार्यक्रमे देशविदेशेभ्यः चतुश्शताधिकाः (४२०) छात्राः शोधच्छात्राः अध्यापकाश्च सहभागमग्रहीषुः। संगोष्ठ्याः उद्घाटनार्थं कुञ्चिकाभाषणं च विधातुम् अमेरिकादेशस्य “संस्कृतग्रन्थालय” इति संस्थाया अध्यक्षाः **आचार्याः पीटर् एम्. शार्फ़ महोदयाः** समायासिषुः। कार्यक्रमस्यास्य अध्यक्षपदं मान्याः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः** अलमकुर्वन्। समागतानां समेषां स्वागतम् अनुसन्धानप्रकाशनविभागाध्यक्षाः **आचार्याः के. सूर्यनारायणमहोदयाः** व्यदधुः। विविधसंशोधनपरकान् विषयानाधृत्य मार्गदर्शनं कर्तुं हैदराबादविश्वविद्यालयस्य संस्कृतविभागस्याचार्याः **डा. जे.एस्.आर्. प्रसादमहोदयाः**, चेन्नैनगरस्थकृष्णमाचार्ययोगमन्दिरस्य निदेशकाः **डा. जयरामन्महादेवन्महोदयाः**, कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य भारतीयतत्त्वज्ञानधर्मसंस्कृतिसंकायप्रमुखाः आचार्याः डा. पेन्नामधुसूदनमहोदयाश्च अधिवक्तारः समायुः।




विभागस्य सहाचार्याः डा. **सि.एच्.नागराजुमहोदयाः डा. रागिवेङ्कटाचारिमहोदयाश्च** अधिवक्तॄणां परिचयमकार्षुः। सम्पूर्णकार्यक्रमस्य संचालनं संगोष्ठ्याः समन्वयकेन **डा. शिवरामभट्टमहोदयेन** अकारि। इत्थं महता उत्साहेन अन्तर्जालमाध्यमेन संगोष्ठीयं समायोज्यत।







एकाहसंगोष्ठ्याः बीजभाषणं कुर्वन्तः आचार्याः पीटर् एम्. शार्फ़ महोदयाः




अध्यक्षभाषणं कुर्वन्तः मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः










एकदिनान्ताराष्ट्रियसंगोष्ठ्यां विविधसंशोधनविषयेषु मुख्यवक्तार: क्रमेण -

भाग्यनगरात् आचार्या: जे.एस्.आर्. प्रसादमहोदया:

चेन्नैनगरात् आचार्या: जयरामन्महादेवन्महोदया:

नागपुरात् आचार्या: पेन्नामधुसूदनमहोदया:

## कुलपतिमहोदयानां व्याख्यानम्

**दिनाङ्क: - २८.०६.२०२०**

दिल्लीप्रान्ते विद्यमानया संस्कृतभारत्या २८.०६.२०२० दिनाङ्के समायोजतायां व्याख्यानमालायाम् अस्माकं कुलपतय: **आचार्या: वि. मुरलीधरशर्ममहदया: "प्राचीनभारतीयशिक्षा"** इति विषयमभिलक्ष्य अन्तर्जालीयामुखपटलमाध्यमेन व्याख्यानमदु:। शताधिका: संस्कृतानुरगिण: आमुखपटले उपस्थिता आसन्।



# अन्तर्जालीया राष्ट्रियसंगोष्ठी - काव्यालोकः

**दिनाङ्कः - 25-26.06.2020**

तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालये साहित्यविभागपक्षतः काव्यालोकः इति विषयमधिकृत्य द्विदिवसीया अन्तर्जालीया राष्ट्रियसङ्गोष्ठी आयोजिता। तत्र कविः, काव्यम्, सहृदयः, काव्यप्रयोजनम्, काव्यकारणम्, काव्यभेदाः, रसः, गुणाः, अलङ्काराः, रीतिः, ध्वनिः, वक्रोक्तिः, अनुमानम्, औचित्यम्, चमत्कारः, शब्दवृत्तयः, शय्या, पाकः तदितरे काव्यावयवभूताः अंशाः आसन्।




अस्याः सङ्गोष्ठ्याः आरम्भः 25-06-2020 दिनाङ्के प्रातः दशवादने अभवत्। सङ्गोष्ठ्याध्वर्यं राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिभिः **आचार्यैः वि. मुरलीधरशर्ममहोदयैः** व्यधायि। अस्याः सङ्गोष्ठ्याः पर्यवेक्षणं विश्वविद्यालयस्य शैक्षिकसङ्कायप्रमुखाः तथा साहित्यविभागाध्यक्षाः आचार्यराणिसदाशिवमूर्तिवर्याः अकृषत। एवम् अस्याः सङ्गोष्ठ्याः मार्गदर्शनम् अस्य विश्वविद्यालयस्य साहित्य-संस्कृति सङ्कायप्रमुखाः, प्रभारिकुलसचिवाः **आचार्याः जि.यस्. आर्. कृष्णमूर्तिमहाभागाः** कृतवन्तः। सङ्गोष्ठ्याः आरम्भदिने श्रीलालबहादूरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नई दिल्ली इत्यस्य मान्याः कुलपतयः **आचार्याः रमेशकुमारपाण्डेयमहोदयाः** मुख्यातिथिसन्देशभाषणम् अकुर्वन्।

षट् सत्राणाम् आयोजनम् अस्यां सङ्गोष्ठ्यां कृत्वा विविधसाहित्यकविषयाणां चर्चा एतेषु सत्रेषु कृता। प्रथमसत्रस्याध्यक्षाः **आचार्याः जि.एस्.आर्. कृष्णमूर्तिमहोदयाः**। एते रससङ्ख्याविचारमुपस्थाप्य अन्येषां भागग्रहीतॄणां पत्राणि व्यश्लेषयन्। **आचार्याः के. राजगोपालन्महाभागाः** द्वितीयसत्रस्याध्यक्षतां स्वीकृत्य भागग्रहीतॄणां पत्राणि समालोचयन्। तृतीयसत्रस्याध्यक्षाः **आचार्याः सत्यनारायणाचार्यमहोदयाः** ध्वनिप्रस्थानमिति विषयमुपलक्ष्य भाषणं अदुः। तत्र भागग्रहीतॄणां पत्राणि आलोचितवन्तः। चतुर्थसत्रस्याध्यक्षाः **आचार्याः राणिसदाशिवमूर्तिमहोदयाः** आसन्। ते कवि-काव्यभेदाः इति विषयस्योपरि उपन्यासं दत्तवन्तः तथा भागग्रहीतॄणां पत्राणि विश्लेषितवन्तः। **आचार्याः चक्रवर्तिरङ्गनाथन्महोदयाः** पञ्चमसत्रस्याध्यक्षपदमूढ्वा अलङ्काराणामुपरि स्वीयं भाषणं दत्तवन्तः। तथा छात्राणां पत्राणि श्रुत्वा तेषां मार्गदर्शनं कृतवन्तः। षष्टसत्रस्याध्यक्षाः **डा.जे. बलिचक्रवर्तिमहोदयाः** भासकवेः वैशिष्ट्यमिति विषयमुपस्थाप्य भागग्रहीतॄणां पत्राणि श्रुतवन्तः।



काव्यालोकः नाम अन्तर्जालीयाया: राष्ट्रियसङ्गोष्ठ्याः समापनोत्सवः 26-06-2020 दिनाङ्के समभवत् । तत्र समापने मुख्यातिथित्वेन **आचार्याः जि.एस्.आर्. कृष्णमूर्तिमहोदयाः** तथा सभायाः आध्यक्षम् **आचार्याः राणि सदाशिवमूर्तिमहोदयाः** एवं सङ्गोष्ठीनिवेदिकासमर्पणम् **आचार्याः चक्रवर्ति रङ्गनाथन् महोदयाः** कृतवन्तः। सभायाः सञ्चालनं डा.श्वेतपद्मा शतपथीमहाभागा कृतवती।

अनेन प्रकारेण द्विदिवसीया अन्तर्जालीया राष्ट्रिया सङ्गोष्ठी सुसम्पन्ना । तथा छात्राः अपि सोत्साहेन विविधविषयान् ज्ञात्वा स्वीयानुभवान् प्रास्तुवन् ।

## सेवानिवृत्ताः आचार्याः





अद्वैतवेदान्तभास्कराः आचार्याः एम्.एल्.नरसिंहमूर्तिमहाभागाः

गुरुवरेभ्यः श्री.एँ.एल्.एन्.मूर्तिमहोदयेभ्यः सादरं साञ्जलिकरं समर्पयामः

प्रासादिकं रूपमहो विभाति चित्ते पुरस्तादिव दीर्घकायम् ।<br>
आजानुबाहं सुगभीरभावमस्मासु वात्सल्यकृतस्मिताभम् ।।1

फाले विशाले धृतभस्मरेखा दिवासुधांशोरिव न स्फुटा भा ।<br>
सभातले ब्रह्ममयं तु तेजो दूरादवेक्ष्यान्वभवाम शान्तिम् ।।2

वचस्सु च व्याकृतिसम्मतेषु गम्भीरकण्ठस्य सदादृतेषु ।<br>
व्यर्थप्रशंसाविमुखेषु शिष्या बभूविमारात् पुटितस्वहस्ताः ।।3

धनेन मिथ्यावचसा विभूत्या प्रलोभनीयो न तु जातु यः स्यात् ।<br>
तं धीरमाहुः, न वयं त्वदन्यं तथाविधं तत्र निरूपयामः ।।4

यः कौलपत्यं समुपागतं तद्लीकशोभं विगणय्य विद्वान् ।<br>
द्वैतं यथाद्वैतसुखेन शान्त्या विराजते तं गुरुमास्तुमस्त्वाम् ।।5

लक्ष्मीमयो यस्य सदानुभावो नारायणस्येव गुरोरमुष्य ।<br>
मूर्तिः प्रणम्या हृदयेषु भूष्णुः कृताऽन्तरङ्गस्थितसाधुशिष्यैः ।।6

वस्त्रेण वपुषा वाचा विद्यया विनयेन च।<br>
शोभमानाय गुरवे श्लोकषट्कं समर्प्यते।।

- विष्णु-रङ्गनाथ-प्रभृतयः शिष्याः ।।

**राष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदान्तविभागस्य मूर्धन्या आचार्याः एम्.एल्.नरसिंहमूर्तिमहोदयाः विश्वविद्यालये स्वकीयसुदीर्घसेवां विधाय २०२० अगस्ट् मासे सेवानिवृत्ताः । तान् सम्मानमयन्तः मान्याः कुलपतयः कुलसचिवाः संकायप्रमुखाः विभागप्रमुखाश्च । श्लोकप्रशस्तिं समार्पयन्तच्छिष्याश्च ।**



NAVAJEEVAN BLIND RELIEF CENTRE
TIRUCHANUR- TIRUPATI- 517 503

The president and member of Navajeevan Trust are cordially congratulate and Honor

CERTIFICATE OF HONOUR

PROF. TATTA VIJAYA RAGHAVACHARYULU
Professor Department of Agama,
National Sanskrit university, Tirupati (A.P.)
on the auspicious occasion of SRI GANESH JAYANTHI DAY
Presenting the Award entitled

NAVAJEEVAN VIDWAN MANI VIDYA SEVA PURASKAR

For his National and inter National level reputation. In the field of education, especially towards traditional Sastras i.e Sahitya -Visishtadvaita- Vedantha-Agama-Divya Prabandha etc and his outstanding social Service, towards Poor Students.

Awarded on 22- August-2020, on Sri Ganesh Jayanthi day at Navajeevan Centre-Tirupati.
With Om Namo Venkatesaya

Date: 22-08-2020
Place: Tirupati

Dr.K.Sridhar Acharya
(Founder /Prsident)

## नवजीवनविद्वन्मणिविद्यासेवापुरस्कारः

विश्वविद्यालयस्य आगमविभागस्य आचार्याः तट्टश्च विजयराघवाचार्युलुमहोदयाः Navajeevan Blind Relief Centre, Tirupati इति संस्थया २०२० अगस्ट् मासे

नवजीवनविद्वन्मणिविद्यासेवापुरस्कारेण

सम्मानिताः।

## सेवानिवृत्ता आचार्याः



विश्वविद्यालयस्य अद्वैतवेदान्तविभागस्य आचार्याः सायिरामशर्ममहोदयाः विश्वविद्यालये स्वकीयसेवां विधाय ३१.०७.२०२० दिने सेवानिवृत्ताः।

महोदयान् सम्मानयन्तः आचार्याः कुलपतयः, अन्ये च मान्याः।

## सेवानिवृत्तः शिक्षकसहयोगिकर्मकरः



k. सुब्रह्मण्यमहोदयः ३१.०८.२०२० दिनाङ्के सेवानिवृत्तः। तं सम्मानयन्तः मान्याः कुलपतयः कुलसचिवाः संकायप्रमुखाश्च




भुवनेश्वरे विद्यमानस्य Divine Life Society इत्यस्य स्वामिचरणाः शिवचिदानन्दसरस्वतीमहाभाद गाः विश्वविद्यालयस्य साहित्यविभागे सहाचार्येण डा. भारतभूषणरथमहोदयेन विरचितं पुस्तकं प्राकाशयन्।

# NEW TRENDS IN EDUCATIONAL PSYCHOLOGY

## द्विदिना अन्तर्जालीयसंगोष्ठी

**दिनाङ्कः - ०२-०३.०७.२०२०**

राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाविभागेन ०२-०३.०७.२०२० दिनाङ्कयोः “NEW TRENDS IN EDUCATIONAL PSYCHOLOGY” दिनद्वयात्मिका अन्तर्जालीया राष्ट्रियसंगोष्ठी समायोज्यत। अस्याः उद्घाटनसमारोहे ०२.०७.२०२० दिनाङ्के मुख्यातिथिरूपेण तिरुपतिस्थपद्मावतीमहिलाविश्वविद्यालयस्य मान्याः कुलपतयः **आचार्याः डि. जमुनामहोदयाः** समुपस्थिताः आसन्। अध्यक्षत्वेन विश्वविद्यालयस्य आदरणीयाः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः** उपस्थाय भारतीयपाश्चात्यमनोविज्ञानस्य स्वरूपं महत्त्वं च प्रत्यपादयन्। देशस्य नानाकोणेभ्यः समागताः सहभागिनः विविधविषयेषु शोधपत्रं प्रास्तुवन्। ०३.०७.२०२० दिनाङ्के जाते अस्याः समापनसमारोहे राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः उपपरामर्शकाः **डा. गणेशहेगडेमहोदयाः मुख्यातिथित्वेन** समुपस्थाय राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः मूल्याङ्कनप्रक्रियां सप्तानां निकषाणां च संक्षिप्तं स्वरूपं न्यरूपयन्। **आचार्या के. कादम्बिनीमहोदया** संगोष्ठ्याः संयोजिका आसीत्। सहाचार्या **एस्. वैष्णवी** समन्वयिका आसीत्। नैके सहभागिनः स्वकीयं शोधपत्रं प्रास्तुवन्।



















## अन्तर्जालमाध्यमेन आयोजितायां द्विदिनसंगोष्ठ्यां विराराज्यन्ते मान्याः सहभागिनश्च

## संस्कृतशिक्षाजगति अस्मद्विश्वविद्यालयस्य भूमिका – चर्चासत्रम्

**दिनाङ्कः - ०९.०७.२०२०**




राष्ट्रियसंस्कृतविश्वविद्यालयस्य मान्यानां कुलपतीनाम् **आचार्याणां वि. मुरलीधरशर्ममहोदयानाम्** आध्यक्ष्ये **“संस्कृतशिक्षाजगति अस्मद्विश्वविद्यालयस्य भूमिका”** इति विषयमुपलक्ष्य विश्वविद्यालयस्य अध्यापकैः सह एकदिनात्मकं चर्चासत्रमायोज्यत। तत्र नवदेहलीस्थस्य संस्कृतसंवर्धनप्रतिष्ठानस्य न्यासिसचिवाः **पद्मश्रीभूषिताः श्रीचमूकृष्णशास्त्रिमहोदयाः** दिशानिर्देशपुरस्सरम् अमूल्यं मार्गदर्शनमकार्षुः। विश्वविद्यालयस्य नवत्यधिकाः अध्यापकाः चर्चासत्रेऽस्मिन् सहभागं स्व्यकार्षुः।

## राष्ट्रियशिक्षादिवसः



राष्ट्रियसंस्कृतविश्वविद्यालयस्थशिक्षाशास्त्रविभागेन राष्ट्रियशिक्षादिवसमुपलक्ष्य शिक्षायाः महत्वम् (Importance of Education) इति विषयमधिकृत्य वैद्युतीयसङ्गोष्ठी 11.11.2020 दिनाङ्के आयोजिता। अस्याः संङ्गोष्ठ्या अध्यक्षा **आचर्या के. कादम्बिनीमहोदया** आसीत्। शिक्षाचार्यद्वितीयवर्षीया देवीकल्याणी सभासञ्चालिका आसीत्। सभायामस्यां शिक्षाचार्यद्वितीयवर्षीयछात्राः उपस्थिताः। तेषु षट् छात्राः सुभाषितेषु वर्णितं शिक्षायाः महत्वम्, बहुसंस्कृतिवादः, वैद्युतीयाधिगमः – लाभाः हानिश्च, प्राचीना-अर्वाचीना च शिक्षा, शिक्षायाः महत्वम्, शिक्षायाः प्रकाराः इति शिक्षासम्बद्धविषयेषु स्वकीयपत्राणि प्रस्तुतीकृतवन्तः। अन्ते धन्यवादसमर्पणपूर्वकं संङ्गोष्ठ्याः समापनम् अभूत्।

# विश्वविद्यालयप्राङ्गणे श्रीजगन्नाथरथयात्रा

## CAR FESTIVAL OF LORD SRI JAGANNATH IN UNIVERSITY COMPOUS

### दिनाङ्कः - २४.०७.२०२०





प्रतिसंवत्सरम् आषाढमास-शुक्लपक्ष-द्वितीयातिथौ ओडिशाराज्यस्य सुप्रसिद्धे पुरुषोत्तमक्षेत्रे श्रीजगन्नाथमहाप्रभोः रथयात्रा महता वैभवेन परिपाल्यते। तदवसरे देशविदेशेषु निर्मितेषु सर्वेषु जगनाथमन्दिरेष्वपि उत्सवस्यास्य परिपालनं तद्भक्तगणैरवश्यं क्रियते। महतः सौभाग्यस्य विषयोऽयं यत् नियतपवित्रिते विद्यापीठप्राङ्गणे प्रतिष्ठापिते उत्कलपीठे विद्यमानानां श्रीजगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनाख्यां चतुर्विधमूर्तीनां रथयात्रामहोत्सवः ऐषमः 24.07.20 दिनाङ्के परिपालितः। विविध-वैदिकमन्त्रैः नानावस्त्रालंकारविभूषितानां विग्रहाणां मन्दिरसिंहासनात् आनीय (पहण्डिद्वारा) रथोपरि संस्थापनमक्रियत। श्रीविग्रहाणां रथोपरि आनयनं "पहण्डिइ विजे" इति कथ्यते। तत्र विधानानुसारं पुर्यां यथा गजपतिमहाराजः स्वर्णमार्जन्या रथपरिष्करणं करोति तथैव विद्यापीठस्य प्रमुखाधिकारिणः कुलपतयः रथमार्जनमकुर्वन्। एवं साटोपं रथयात्रा विद्यापीठपरिसरे आयोयिता। यात्रायामस्यां विद्यापीठस्य कुलपतयः कुलसचिवाः अधिकारिणः अध्यापकाः कर्मचारिणः छात्राश्च भागमगृह्णन्।







# संस्कृतसप्ताहः

**दिनाङ्कः - ०३-०९.०८.२०२०**

राष्ट्रियसंस्कृतविश्वविद्यालये ऐषमः संस्कृतसप्ताहमहोत्सवः महता वैभवेन ०३.०८.२०२० दिनाङ्कादारभ्य ०९.०८.२०२० दिनाङ्कपर्यन्तं समाचर्यत । कोरोना-महामारीसन्दर्भेऽस्मिन् अन्तर्जालमाध्यमेन समेषां निमित्तं विविधाः कार्यक्रमाः समायोज्यन्त । ०३.०८.२०२० दिनाङ्के प्रातः १०.३० वादने भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य महामन्त्रिणं मान्याः **डा. रमेश-पोखरियालनिशङ्कमहोदयाः** मुख्यातिथिपदं विभूष्य संस्कृतसप्ताहसमारोहमुदघाटयन् । मान्याः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः** स्वागतभाषणं व्यदधुः । मान्याः कुलसचिवाः **आचार्याः जि.यस्.आर्. कृष्णमूर्तिमहोदयाः** धन्यवादसमर्पणमकार्षुः । शैक्षिकसंकायप्रमुखाः **आचार्याः राणिसदाशिवमूर्तिमहोदयाः** सभासंचालनमकुर्वन् । इत्थं संस्कृतसप्ताहोद्घाटनकार्यक्रमः माननीयानां मन्त्रिणां करकमलाभ्यां संजात इति वैषिष्ट्यम् ।







संस्कृतसप्ताहेऽस्मिन् प्रतिदिनमेकैकः कार्यक्रमः समायोज्यत। यथा – कवितागोष्ठी, सङ्गीतनृत्यसभा,सर्वविभागीयसंगोष्ठ्यः, शास्त्रार्थसंगोष्ठी, भाषाकौशलम्, बालगोकुलम्, शास्त्रीयं व्याख्यानम् इत्येवं कार्यक्रमाः छात्राणामध्यापकानां चोपस्थितौ महता उत्साहेन समायोजिषत । अपि च विश्वविद्यालयस्य अध्यापकैः छात्रैश्च आधुनिकमाध्यमानां सहयोगेन विविधानि दृश्यमुद्रणानि निर्माय आमुखपटलादिषु अध्यारोप्यन्त । पुनश्च ग्रन्थाध्ययनसप्ताहत्वेन **कर्णभारम्** इति नाटकमपि समेषां निमित्तम् आयोज्यत ।




संस्कृतसप्ताहे संगीतकार्यक्रमः




संस्कृतसप्ताहे विविधशास्त्रेषु विदुषां शास्त्रसंगोष्ठी




संस्कृतसप्ताहे बालगोकुलच्छात्राणां कार्यक्रम:




संस्कृतसप्ताहे विदुषां कवितागोष्ठी

## संस्कृतसप्ताहस्य समापनमहोत्सवः

०९.०८.२०२० दिनाङ्के संस्कृतसप्ताहमहोत्सवस्य समापनसमारोहे संस्कृतसंवर्धनप्रतिष्ठानस्य न्यासिसचिवा: पद्मश्रीविभूषिता: मान्या: चमूकृष्णशास्त्रिमहोदया: मुख्यातिथित्वेन समायासिषु: । समापनमहोत्सवे शास्त्रिमहोदयानां **"संस्कृतशिक्षणम् अन्तर्जालीया: अवसराश्च"** इति विषयमभिलक्ष्य विशिष्टव्याख्यानमप्यायोजितमासीत् । अस्मिन् अवसरे संस्कृतज्ञै: कर्तुं शक्या: करणीयाश्च बहव उपाया: समसूच्यन्त । मान्या: कुलाधिपतय: **श्रीमन्त: नी. गोपालस्वामिवर्या:** आध्यक्ष्यं निरवहन् । मान्या: कुलपतय: आचार्या: वि. मुरलीधरशर्ममहोदया: समागतानां स्वागतं व्याहरन् । शैक्षिकप्रमुखा: **आचार्या: राणिसदाशिवमूर्तिमहोदया:** सम्पूर्णसंस्कृतसप्ताहकार्यक्रमस्य इतिवृत्तमवोचन् सभासंचानं चाकुर्वन् । **आचार्या: प्रह्लादजोशिमहोदया:** धन्यवादसमर्पणमकुर्वन् । विश्वविद्याम्र लयस्य नैके छात्रा: अध्यापकाश्च कार्यक्रमेऽस्मिन् उपस्थिता: । इत्थं विविधकार्यक्रमै: ऐषम: संस्कृतमहोत्सव: महता उत्साहेन समपद्यत ।




समापनमहे मान्याः कुलाधिपतयः अतिथयः कुलपतयश्चेत्यादयः




संस्कृतसप्ताहे शास्त्रिमहोदयानां व्याख्यानम्

# राष्ट्रियशिक्षानीतिः – 2020
## द्विदिवसीया अन्तर्जालीया राष्ट्रियसङ्गोष्ठी

**दिनङ्कः - ०४-०५.०९.२०२०**

तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविभागेन राष्ट्रियशिक्षानीतिः 20 इति विषयमधिकृत्य सेप्टेम्बरमासस्य 4, 5 दिनाङ्कयोः द्विदिवसीया अन्तर्जालीया राष्ट्रियसङ्गोष्ठी समायोजिता। सङ्गोष्ठ्यामस्यां राष्ट्रस्य विभन्नराज्येभ्यः विभिन्नविश्वविद्यालयानाम् आचार्याः, सहाचार्याः, सहायकाचार्याः, संस्कृतशिक्षकाः, शोधच्छात्राश्च पत्रवाचनमकुर्वन्।

उद्घाटनसमारोहः (दि.04-09-20, प्रातः 10.30)


आचार्यः प्रह्लादजोशी


प्रो. पि. वेङ्कटरावः

सङ्गोष्ठ्याः अस्याः उद्घाटनसमारोहः 04-09-20 दिनाङ्के प्रातः 10.30 वादने विश्वविद्यालयस्य मान्यकुलपतेः आचार्यस्य वि. मुरलीधरशर्ममहोदयस्य आध्यक्ष्ये सम्पन्नः। कार्यक्रमस्यास्य मुख्यातिथिः आसीत् विश्वविद्यालयानुदानायोगस्य सहायुक्ता मान्या डा. (श्रीमती) अर्चना ठाकूरमहोदया आसीत्। अयं कार्यक्रमः कु. वसुप्रदायाः मङ्गलाचरणेन समारब्धः। तदनु शिक्षासङ्कायाध्यक्षः आचार्यः प्रह्लादजोशीमहोदयः समुपस्थितानाम् अतिथीनां स्वागतमकरोत्। ततः परं शिक्षाशास्त्रविभागाध्यक्षः प्रो. पि. वेङ्कटरावमहोदयः मुख्यातिथेः डा. (श्रीमती) अर्चना ठाकूरमहोदयायाः स्वागतं परिचयञ्चाकरोत्।



मुख्यातिथिः
डा. अर्चना ठाकूरः

## मुख्यातिथिभाषणम्

तदनु कार्यक्रमस्य मुख्यातिथिः डा. अर्चना ठाकूरमहोदया स्वकीयभाषणे राष्ट्रियशिक्षानीतिः 2020 इत्यस्य स्वरूपं वर्णयन्ती विश्वविद्यालयशिक्षा कौशलकेन्द्रिता, बहुविषयकेन्द्रिता च भविष्यतीति अवदत्। अस्याः उद्देश्यं वैश्विकस्तरे 2040 वर्षाभ्यन्तरे भारतं महच्छशक्तिशालिरूपेण परिवर्तनमिति, तथैव शिक्षायां समानता तथा गुणवत्तापूर्णशिक्षा इति प्रास्तौत्।

## अध्यक्षभाषणम्



अध्यक्षः
आचार्यः वि. मुरलीधरशर्मा

कार्यक्रमस्य अध्यक्षः मान्यः कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोयः स्वकीये अध्यक्षभाषणे संगोष्ठ्याः अस्याः प्रासङ्गिकतां समुपवर्ण्य अग्रिमे काले शिक्षायाः स्वरूपपरिवर्तने राष्ट्रियशिक्षानीतिः 2020 इत्यस्य आधारेण संस्कृतशिक्षाविकासे विश्वविद्यालयस्य तथा शिक्षाविभागस्य भूमिकाञ्च प्रास्तौत्। राष्ट्रियशिक्षानीतेः क्रियान्वयनदृष्ट्या विश्वविद्यालयस्य कार्याणि कर्त्तव्यानि च प्रास्तौत्।

अन्ते धन्यवादार्पणं संगोष्ठ्याः सहसंयोजकः डा. ए. सच्चिदानन्दमूर्तिः अकरोत्। उद्घाटनकार्यक्रमस्य सञ्चालनं संगोष्ठ्याः संयोजकः प्रो. एस्. मुरलीधररावुमहोदयः अकरोत्।



प्रो. एस्. मुरलीधररावः



डा. ए. सच्चिदानन्दमूर्तिः

## प्रथमसत्रम्

**दि. 04-09-2020, 12.00 - 1.00**

सत्राध्यक्षः - आचार्यः रजनीकान्तशुक्लः, शिक्षाविभागः

पत्रप्रस्तोतारः - 1. श्री देसु हरिकृष्णः, सहायकाचार्यः, अरोरा महाविद्यालयः, हैदराबाद,

2. श्री नन्द दुलाल, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, अगर्तला

3. श्री सोमित्रः भट्टाचार्यः

4. वी. प्रदीप कुमारः, शोधच्छात्रः

सञ्चालिके - डा. श्रीमती ए. सुनीता, सहायकाचार्या, शिक्षाविभागः

कु. वैष्णवी, सहायकाचार्या, शिक्षाविभागः

## द्वितीयसत्रम्

**दि. 04-09-2020, 2.00 – 3.00**

सत्राध्यक्षः - आचर्यः प्रह्लाद रा. जोशी, शिक्षासङ्कायप्रमुखः

पत्रप्रस्तोतारः - 1. डा. अरुण भट, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, शृंगेरी

2. श्री तन्मयमण्डल, शोधच्छात्रः

3. डा. वेणुगोपालरावः, केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर

सञ्चालकः - डा. ए. शेखररेड्डी, सहायकाचार्यः, शिक्षाविभागः

## तृतीयसत्रम्

**दि. 04-09-2020, 3.10 – 4.10**

सत्राध्यक्षा - आचार्या. एन्. लता, , शिक्षाविभागः

पत्रप्रस्तोतारः - 1. डा. विद्याधरः प्रभल, केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर

2. श्री आशिषकुमार पाण्डेय, शोधच्छात्रः

3. कु. स्वातीरेका साहू, शोधच्छात्रा

4. श्री शङ्कर बेरा, शोधच्छात्रः

सञ्चालकः - डा. दत्तात्रेयशर्मा, सहायकाचार्यः, शिक्षाविभागः

## चतुर्थसत्रम्

**दि. 04-09-2020, 4.20 – 5.20**

सत्राध्यक्षः - डा. के. के. शैन्, सहाचार्यः, अध्यक्षः, NCTE-दक्षिणक्षेत्रीयसमितिः

पत्रप्रस्तोतारः - 1. डा. एम्. आदेन्न नायक्, सहायकाचार्यः, शिक्षाविभागः

2. कु. श्रुति के. बी. शोधच्छात्रा

3. श्री विष्णुभट्ल रामलिंगेश्वर शर्मा, शोधच्छात्रः

4. श्री एस्. वी. विजयकुमारः, शोधच्छात्रः

सञ्चालकौ - डा. सो. ल. सीताराम शर्मा, सहायकाचार्यः, शिक्षाविभागः

डा. वैजर्सु बालसुब्रह्मण्यम्, सहायकाचार्यः, शिक्षाविभागः

## पञ्चमसत्रम्

दि. 04-09-2020, 5.30 - 6.30

सत्राध्यक्षः - आचार्यः पी. वेंकटरावः, शिक्षाशास्त्रभागाध्यक्षः

पत्रप्रस्तोतारः - 1. डा. जि. उमानरसिंहमूर्तिः, सहायकाचार्यः, शिक्षाविभागः

2. डा. श्रीकरः, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, शृंगेरी

3. डा. एस् टी पी कनकवल्ली, PDF

4. श्री सिद्धार्थ शङ्कर मण्डल, शोधच्छात्रः

सञ्चालकौ - डा. जि. उमानरसिंहमूर्तिः, सहायकाचार्यः, शिक्षाविभागः

डा. एम्. आदेन्न नायक्, सहायकाचार्यः, शिक्षाविभागः

## षष्ठसत्रम्

**दि. 05-09-2020, 10.00 - 11.00**

सत्राध्यक्षा - आचार्या के. कादम्बिनी, शिक्षाविभागः

पत्रप्रस्तोतारः - 1. डा. एन्. वी, श्रीनिवासरावः, सहायकाचार्यः, तिरुपतिः

2. डा. कुमारः बागेवाडीमठ, सहायकाचार्यः, शिक्षाविभागः

3. डा. विजयकुमारदासः, शोधच्छात्रः

4. श्री मिलन् माजी, शोधच्छात्रः

5. कु. दीपान्विता दास, शोधच्छात्रः

सञ्चालकः - डा. कुमारः बागेवाडीमठ, सहायकाचार्यः, शिक्षाविभागः

## सप्तमसत्रम्

**दि. 05-09-2020, 11.10 - 12.10**

सत्राध्यक्षः - आचार्यः एस्. दक्षिणामूर्तिशर्मा, शिक्षाविभागः,

निदेशकः, अन्नमाचार्यपरियोजना, सम्पादकः(प्र), सप्तगिरिमासपत्रिका च

पत्रप्रस्तोतारः - 1. श्री कृष्णानन्दः दनाना, केन्द्रीयसंस्कृतविश्वविद्यालयः, हिमाचलप्रदेशः

2. डा. जयन्तः नुनिया, सहायकाचार्यः, शिक्षाविभागः

3. कु. सलवादि वसुधा, शोधच्छात्रा

4. श्री हरेकृष्णदासः, शोधच्छात्रः

5. श्री अरुणेन्द्रठाकूरः, शोधच्छात्रः

6. श्री कपिलवायि रैवतशर्मा, शोधच्छात्रः

सञ्चालकौ - डा. पी माधवरावः, सहायकाचार्यः, शिक्षाविभागः

डा. जयन्तः नुनिया, सहायकाचार्यः, शिक्षाविभागः

## अष्टमसत्रम्

**दि. 05-09-2020, 12.20 - 1.20**

सत्राध्यक्षः - आचार्यः राधागोविन्दत्रिपाठी, शिक्षाविभागः,

पत्रप्रस्तोतारः - 1. कु. एस्. वैष्णवी, सहायकाचार्यः, शिक्षाविभागः

2. डा. आशिष खान, सहायकाचार्यः, कलकत्ता

3. डा. एस्. कृष्णा, केन्द्रीयसंस्कृतविश्वविद्यालयः, मुम्बई

4. कु. यदुश्री के. पी., शोधच्छात्रा

5. श्री अवस्थिशैलेशकुमारः, शोधच्छात्रः

6. डा. पी. सुभाषचन्द्रबोसः, शोधच्छात्रः

7. डा. ए. चारुकेशः, सहायकाचार्यः, शिक्षाविभागः

सञ्चालकः - डा. ए. चारुकेशः, सहायकाचार्यः, शिक्षाविभागः

## नवमसत्रम्

**दि. 05-09-2020, 2.00 - 3.00**

सत्राध्यक्षः - डा. बी. पी. एम्. श्रीनिवासः, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, पुरी

पत्रप्रस्तोतारः - 1. डा. आलोकमण्डल, सहायकाचार्यः, शिक्षाविभागः

2. डा. मण्डल चन्द्रशेखरगौड, सहाचार्यः, तेलंगाणा

3. डा. कोम्पेल्ल शिवकुमारः, संस्कृताध्यापकः, तेलंगाणा

4. श्री कोदण्डपाणिः, शोधच्छात्रः

5. श्री विश्वजित् प्रामाणिक्, शोधच्छात्रः

6. श्री विमलेश झा, शोधच्छात्रः

सञ्चालकः - डा. आलोकमण्डल, सहायकाचार्यः, शिक्षाविभागः

## दशमसत्रम्

**दि. 05-09-2020, 3.10 - 4.10**

सत्राध्यक्षः - डा. आर्. चन्द्रशेखरः, सहाचार्यः, शिक्षाविभागः

पत्रप्रस्तोतारः - 1. डा. लक्ष्मणकुमारः, सहायकाचार्यः, शिक्षाविभागः

2. कु. अर्चकं श्रीविद्या, शोधच्छात्रः

3. कु उमा मन्ना, शोधच्छात्रा

4. श्री चन्दनपाल, शोधच्छात्रा

सञ्चालकः - डा. लक्ष्मणकुमारः, सहायकाचार्यः, शिक्षाविभागः

### समापनसमारोहः (दि. 05-09-2020, सायम् 5.00 वादने)

सङ्गोष्ठ्याः समापनसमारोहः 05-09-20 दिनाङ्के सायं 5.00 वादने विश्वविद्यालयस्य मान्यकुलपतेः आचार्य. वि. मुरलीधरशर्ममहोदयस्य आध्यक्ष्ये सम्पन्नः। कार्यक्रमस्यास्य मुख्यातिथिः आसीत् देहलीस्थस्य संस्कृत_ संवर्धनप्रतिष्ठानस्य निदेशकः डा.चान्दकिरणसलूजामहोदयः आसीत् । अयं कार्यक्रमः कु. महत्याः मङ्गला_ चरणेन समारब्धः । तदनु शिक्षासङ्कायाध्यक्षः आचार्यः प्रह्लाद रा. जोशीमहोदयः समुपस्थितानाम् अतिथीनां स्वागतमकरोत् । ततः परं सङ्गोष्ठ्याः संयोजकः आचार्यः एस्. मुरलीधररावः सङ्गोष्ठ्याः प्रतिवेदनं प्रास्तौत् ।

### मुख्यातिथिभाषणम्



डा.चान्दकिरणसलूजा

कार्यक्रमस्य मुख्यातिथिः डा.चान्दकिरणसलूजामहोदयः स्वकीयभाषणे राष्ट्रियशिक्षानीति2020 द्वारा संस्कृतशिक्षायै कल्पितान् अवसरान् प्रास्तौत् । तथैव विश्वविद्यालयस्तरे राष्ट्रियशिक्षानीति2020 द्वारा छात्राणां कृते प्रकल्पितानां विभिन्नव्यवस्थानां विषये च प्रास्तौत् ।

### अध्यक्षभाषणम्



आचार्यः वि. मुरलीधरशर्मा

कार्यक्रमस्य अध्यक्षः मान्यः कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोदयः राष्ट्रियशिक्षानीतिः 2020 द्वारा भारतीयशिक्षायां नैकविधविकासकार्याणि भविष्यन्ति, आधुनिकधारायाम् अधीयानाः छात्राः संस्कृतविषयान् पठितुं, तथैव संस्कृतच्छात्राणां कृते आधुनिकविषयान् पठितुं च अवसरः अनया नीत्या प्रकल्पितः इत्यवोचत् । अन्ते धन्यवादार्पणं डा. सो.ल.सीतारामशर्मा अकरोत् । समापनसमारोहस्य सञ्चालनं संगोष्ठ्याः सहसंयोजकः डा. ए. सच्चिदानन्दमूर्तिः अकरोत् ।

डा. ए. सच्चिदानन्दमूर्तिः





डा. सो.ल.सीतारामशर्मा

# संगोष्ठ्याः चित्राणि


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति
(संसद: अधिनियमेन प्रतिष्ठापितः केन्द्रीयसंस्कृतविश्वविद्यालयः)
प्राक्तनं राष्ट्रियसंस्कृतविद्यापीठम्
शिक्षाशास्त्रविभागः
राष्ट्रियशिक्षानीतिः 2020
द्विदिवसीया राष्ट्रिया अन्तर्जालीयसङ्गोष्ठी
दि. 4, 5 सेप्टेम्बर 2020


विषयाः
- 27-08-2020
- 02-09-2020
https://forms.gle/K18WC9ZMnbkpQ3UW7
nsunep20@gmail.com


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति
शिक्षाशास्त्रविभागः
राष्ट्रियशिक्षानीतिः २०२०
द्विदिवसीया राष्ट्रिया अन्तर्जालीयसङ्गोष्ठी
उद्घाटनसमारोहः


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति
शिक्षाशास्त्रविभागः
राष्ट्रियशिक्षानीतिः २०२०
द्विदिवसीया राष्ट्रिया अन्तर्जालीयसङ्गोष्ठी
समापनसमारोहः
zoom














## राष्ट्रियशिक्षानीतिः - छात्रैस्सह एकः परिसंवादः

**दिनाङ्कः - ०८.०९.२०२०**

राष्ट्रियसंस्कृतविश्वविद्यालयेन ०८.०९.२०२० दिनाङ्के **राष्ट्रियशिक्षानीतिः-२०२० - शैक्षिकपरिवर्तने विद्यार्थिनां भूमिका** इति विषये विश्वविद्यालयच्छात्रैः सह परिसंवादकार्यक्रम आयोज्यत । तत्र पद्मश्रीपुरस्कृताः **श्रीचमूकृष्णशास्त्रिमहोदयाः** छात्रैः सह प्रकृतविषये परिसंवादं कृतवन्तः । विश्वविद्यालयस्य शोधच्छात्राः विविधशास्त्रेष्वधीयाना आचार्यच्छात्राश्च सहभागं स्व्यकार्षुः ।



# राष्ट्रियशिक्षानीतेः (२०२०) विशेषसन्दर्भे संस्कृतशिक्षणम्
## (दिनद्वयव्यापिनी अन्तर्जालीया राष्ट्रियसंगोष्ठी)

## Sanskrit Teaching - With special Refference to National Education Policy - 2020
### ( A Two Day National E-symposium)

**दिनाङ्कः - १२-१३.१०.२०२०**

### उद्घाटनसमारोहः

राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविभागेन १२-१३.१०.२०२० दिनाङ्कयोः राष्ट्रियशिक्षानीतेः (२०२०) विशेषसन्दर्भे संस्कृतशिक्षणम् इति विषयमधिकृत्य दिनद्वयव्यापिनी अन्तर्जालीया राष्ट्रियसंगोष्ठी समायोज्यत । दिनद्वयात्मकसंगोष्ठ्याः समुद्घाटनसमारोहे विश्वविद्यालयेन मुख्यातिथित्वेन समाहूताः भारतसर्वकारस्य मान्याः शिक्षामन्त्रिणः **श्रीमन्तः डा. रमेशपोखरियालनिशङ्कमहोदयाः** संगोष्ठीं समुदजीघटन् । अस्मद्विश्वविद्यालयस्य मान्याः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः** कार्यक्रमस्य आध्यक्ष्यं निरवाक्षुः । अस्मिन् सन्दर्भे ई-पुस्तकद्वयं मान्यानां मन्त्रिणां करकमलाभ्यां प्राकाश्यत । -

1) Sanskrit Teachig - with Special Refference National Education Policy-2020.

2) New Trends in Education Psychology.






**उद्घाटनकार्यक्रमे मुख्यातिथिभाषणं कुर्वन्तः मान्याः शिक्षामन्त्रिणः**



शिक्षाशास्त्रसंकायप्रमुखाः **आचार्याः प्रह्लादजोशिमहोदयाः** समागतानां मुख्यातिथीनाम् अध्यक्षाणां वक्तॄणां सहभागिनां च स्वागतं व्याहार्षुः । शिक्षाशास्त्रविभागस्य अध्यक्षाः **आचार्याः पि.वेङ्कटरावमहोदयाः** समागतेभ्यः सर्वेभ्यो धन्यवादकुसुमानि व्यातन्वन् । संगोष्ठ्याः उद्घाटनसमारोहस्य संचालनं संगोष्ठ्याः संयोजकाः **डा. आर्. चन्द्रशेखरमहोदयाः** अकुर्वन् । अस्यां दिनद्वयसंगोष्ठ्यां देशस्य विविधेभ्यः प्रदेशेभ्यः प्रतिष्ठिताः नवदश (१९) विद्वांसः वक्तारः समाहूयन्त । अस्मिन् दिनद्वयकार्यक्रमे अशीत्यधिकषट्शतं (६८०) सहभागिनः भागं स्व्यकार्षुः ।







## समापनसमारोहः




आह्निकद्वयसंगोष्ठ्याः समापनसमारोहे मुख्यातिथित्वेन जयपुरस्थकेन्द्रीयसंस्कृतविश्वविद्यालयपरिसरस्य शिक्षाशास्त्रविभागस्य **आचार्याः वाय्.एस्. रमेशमहाभागाः** समुपातिष्ठन्त । अस्मद्विश्वविद्यालयस्य मान्याः प्रभारिकुलसचिवाः **आचार्याः जि.एस्.आर्. कृष्णमूर्तिमहोदयाः** समापनकार्यक्रमस्य आध्यक्ष्यं निरवहन् । **आचार्याः प्रह्लादजोशिमहोदयाः** स्वागतभाषणं व्यधुः । संगोष्ठ्याः सहसंहोजकः डा. एस्.एल्.सीतारामहोदयः सम्पूर्णकार्यक्रमस्य इतिवृत्तं न्यगदत् । संगोष्ठ्याः संयोजकाः **डा. आर्. चन्द्रशेखरमहोदयाः** सर्वेभ्यः सहभागिभ्यः मान्येभ्यश्च धन्यवादान् व्याहरन् । आयोजनसमितौ अन्यतमा **कु.वैष्णवी** समारोपकर्यक्रमस्य संचालनम् अकृत । आयोजनसमितौ डा. ए. सुनीता, डा. एस्. दत्तात्रेयशर्मा, डा.कुमारबागेवाडीमठ, कु.एस्. वैष्णवी, डा. चारुकेशः,

डा. लक्ष्मणकुमार:, डा. एस्.अदेन्नानायक: च आसन् । इत्थं द्विदिनसंगोष्ठी समपद्यत ।




समारोपकार्यक्रमे भाषणं कुर्वन्तः मुख्यातिथयः आचार्याः वाय्.एस्.रमेशमहोदयाः










संगोष्ठ्याः उद्घाटनकार्यक्रमे मान्यानां शिक्षामन्त्रिणां श्रीमतां रमेशपोखरियालनिशङ्कमहोदयानां करकमलाभ्यां "शिक्षामनोविज्ञाने नवप्रवृत्तयः" " राष्ट्रियशिक्षानीतेः (२०२०) विशेषसन्दर्भे संस्कृतशिक्षणम्" इति ई-पुस्तकद्वयं प्राकाश्यम् आनायि ।

# सर्वसामान्यप्रवेशपरीक्षा
## COMMON ENTRANCE TESTS

राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रिविद्यावारिधिविशिष्टाचार्यपाठ्यक्रमाणां कृते २८-२९.१०.२०२० दिनाङ्कयो: अन्तर्जालीयमाध्यमेन छात्राणां सर्वसामान्यप्रवेशपरिक्षा समायोज्यत । २८.१०.२०२० दिनाङ्के शिक्षाशास्त्रिविद्यावारिधिपाठ्यक्रमाणां कृते परीक्षा विश्वविद्यालयेन समायोजि । २९.२०.२०२० दिनाङ्के विशिष्टाचार्यपाठ्यक्रमस्य कृते परीक्षा समायोज्यत । भारतस्य द्वादशानां नगराणाम् (विजयवाडा, जयपुर, वाराणसी, तिरुपति इत्यादि) षोडशसु केन्द्रेषु संगणकमाध्यमेन इयं परीक्षा समचाल्यत । शिक्षाशास्त्रिनिमित्तं ८६९ छात्रा: परीक्षां व्यलेखिषु: । विद्यावारिधिनिमित्तं १७४ छात्रा: परीक्षां व्यलिखन् । विशिष्टाचार्यनिमित्तं २११ छात्रा: परीक्षां व्यलिखन् ।



विश्वविद्यालयस्य मान्यानां कुलपतीनाम् आचार्याणां वि. मुरलीधरशर्ममहोदयानां संकल्पेन इयं परीक्षा अन्तर्जालमाध्यमेन विश्वविद्यालयस्य इतिहासे ऐदम्प्राथम्येन सफलतया समायोज्यत । भारतस्य सप्तदशसु विश्वविद्यालयेषु अनेन विश्वविद्यालयेनएव अन्तर्जालमाध्यमेन इयं परीक्षा समचालि । कोविड् -१९ इति महमारीसन्दर्भे भारतसर्वकारस्य शिक्षामन्त्रालयस्य मार्गदर्शननुसारम् अत्यन्तं पारदर्शकरूपेण इयं परीक्षा समपाद्यत । मान्यानां कुलपतीनां करकमलाभ्यां परीक्षाणां तिसृणां फलितांशा उदघोष्यन्त । अस्मिन् सन्दर्भे मान्या: कुलसचिवा: आचार्या: ज्.यस्.आर्.कृष्णमूर्तिमहोदया:, शैक्षिकसंकायप्रमुखा: आचार्या: राणिसदाशिवमूर्तिमहोदया:, शैक्षणिकसंकयप्रमुखा: परीक्षाणां समन्वयका: आचार्या: प्रह्लादजोशिमहोदया:, एवं परीक्षाणां सहसमन्वयका: आचार्या: यस्. मुरलीधररावमहोदया:, आचार्या: राधागोविन्दत्रिपाठिमहोदया:, डा. कुमरबागेवाडिमठमहोदया: तान्त्रिकसहाय: आर्. वेङ्कटरामय्यमहोदयश्च उपस्थिता आसन् । शिक्षाशास्त्रिनिमित्तं ६०० छात्रा: विद्यावारिधिनिमित्तं ३५ छात्रा: विशिष्टाचार्यनिमित्तं ९१ छात्राश्च उदतार्यन्त । एवमत्यन्तपारदर्शकत्वेन समा: परीक्षा: समचाल्यन्त ।



६०० उत्तीर्णेषु छात्रेषु अत्यधिकान् अङ्कान् प्राप्तवन्त: दश छात्रा: इत्थं सन्ति –

1)Ruchishree Mishra from Odisha
2)Archana Jena from Odisha
3)Krishnadan Kumar from Bihar
4)Pallishree Paikaray from Odisha
5)Priyadarsini Mahapatra from Odisha
6)Rajanigandha Swain from Odisha
7)Tapaswini Samal from Odisha
8)Rubi Rout from Odisha
9)Sumitra Swain from Odisha
10)Sudipta Mohapatra from Odisha.

## राष्ट्रियप्रवेशार्हतापरीक्षायामुत्तीर्णा: छात्रा:



Sailesh Kumar Awasthi - JRF



Duryodhan Rana - JRF



Shubhankar Samanta -JRF



S.Abhikhya NET



Jagdish Naskar NET



Archana Jena NET



Kulluru Jamal NET



Parvathy VJ NET



Veena Chandran NET



Prabha Sharma NET

**NET/JRF Qualified Students**

सर्वेभ्य:उत्तीर्णच्छात्रेभ्य:राष्ट्रियसंस्कृतविश्वविद्यालय: शेमुषीपरिवारश्च हार्दान्यभिनन्दनानि व्यातनोति ।

# विश्वविद्यालये नवनियुक्तयः

## सप्टेम्बर् २०२०

कोरोनामहामार्याः पीडनेन लोके स्तब्धेऽपि शैक्षणिकप्रगतिम् अकुण्ठयितुकामः राष्ट्रियसंस्कृतविश्वविद्यालयः कर्मकराणां नियुक्तौ अग्रेसरस्सन् विश्वविद्यालयानुदानायोगस्य भारतसर्वकारस्य शिक्षामन्त्रालयस्य च समयोचितसूचनानसारम् अत्यन्तं पारदर्शकतया अन्तर्जालीयमाध्यमेन यशस्वितया साक्षत्कारं विधाय २०२० सप्टेम्बर् मासे बहूनां नियुक्तिं व्यधादिति गौरवास्पदविषयोऽयं समेषाम् ।



Dr. K. Sambasiva Murty (UR)
Controller of Examinations



Prof. G. Sankara-narayanan (UR)
Professor
Dept. of Sahitya



Dr. Udayana Hegde (UR)
Asst. Professor
Dept. of Vyakarana



Shrihari Shivram Dhaygude (UR)
Asst. Professor
Dept. of Advaita Vedanta



Sri Rameshwar Sharma (ST)
Asst. Professor
Dept. of Jyotisha



Dr. K. Sujani (UR)
System Analyst



Mr. Ankit Kumar Meena (ST)
Library Assistant



Smt. Y.Sireesha (EWS)
LDC

कोरोनासंकष्टकालेऽपि अकुण्ठितमनसां विश्वविद्यालयस्याभिवृद्ध्येकलक्ष्यकाणां कष्टं समयमपि सदवसरत्वेन परिकल्पयतां कुलपतीनाम् आचार्याणां वि. मुरलीधरशर्ममहोदयानां कुशलप्रशासने ऐदंप्राथम्येन संस्कृतजगति अन्तर्जालमाध्यमेन युजीसीनियमानुसारम् अत्यन्तं पारदर्शकतया संजातसाक्षात्कारे नियुक्तानां समेभ्यः परीक्षानियन्त्रकाचार्यसहाचार्यशिक्षकेतरकर्मकरेभ्यः शुभाभिनन्दनानि ।

# विश्वविद्यालये नूतननियुक्तयः
## January- 2021

राष्ट्रियसंस्कृतविश्वविद्यालयस्य विकासक्रमे उल्लेखनीयोऽयं विषयो यत् २०२१ जनवरीमासे विश्वविद्यालयस्य प्रबन्धनसमितेः अनुमोदने विविधशिक्षकशिक्षकेतराधिकारिविशिष्टपदानां नियुक्तिरभूदिति ।



Commander Challa Venkateswar (Retd)
Registrar



Shri Munish Malik
Finance Officer



Dr. Satheesha K.S.
(UR) Professor
Dept. of AdvaitaVedanta



Dr. J. Balichakravarthy
(SC) Associate Prof.
Dept. of Sahitya



Dr. A. Suneetha
(SC)Associate Prof.
Dept. of Education



Dr. Rajesh Meena
(ST)Associate Prof.
Dept. of Research & Publications



Dr. Shinde Manoj Angad
(UR) Asst. Professor
Dept. of Advaita Vedanta



Dr. BLVG Jaganmohan
(EWS) Asst. Professor
Dept. of English



Dr. Vasanth N.
(UR)
Deputy Librarian



Shri Krishna Rao
Y.V. (UR)
Deputy Registrar



Shri Khem Raj
Meena (ST)
Nursing Officer



Shri Sayanto
Mahato (OBC)
Preservation Assistant



Shri Nagarjuna
SVNC (PWD-OH)
Lower Division Clerk



Shri Dharavathu
Ramesh (ST)
Library Attendant



Shri Venkata
Karthik (EWS)
Laboratory Attendant



Ms. A. Rasi
(EWS)
Group – C – MTS



Ms. N. Lohitha
Laithya (EWS)
Group – C – MTS

## Career Advancement Scheme (CAS)

25th August, 2020

Associate Professor to Professor



Dr. Krishneshwar Jha
Dept. of Jyotisha

राष्ट्रियसंस्कृतविश्वविद्यालये नवनियुक्तानां कुलसचिववित्ताधिकार्याचार्योपाचार्यसहाचार्योपग्रन्थ-पालोपकुलसचिवसमेतानां समस्तशिक्षकशिक्षकसहयोगिकर्मकराणां विश्वविद्यालयपक्षत: शेमुषीपरिवारपक्षतश्च हार्दानि शुभाभिनन्दनानि ।

# National Youth Day

Date - 20.01.2021




The Birth Anniversary of the one of the greatest personalities to walk on the Indian soil, Swami Vivekananda, is celebrated as National Youth Day every year by the citizens of the country. The contributions of Swami Vivekanada in the fields of religion, youth empowerment and national building are well known to everyone. The NSS wings of NSU organised an online seminar in connection with National Youth Day. The program began with a Vedic invocation by Dr Durga Saran Rath. Dr OGP Kalyana Sastry, PO,Unit-3 welcomed the dignitaries and the volunteers. Speaking on the occasion, Com Ch Venkateswar, Registrar, special guest of the program, presented his views about Swami Vivekananda and his important contribution towards various areas. He stressed the need of putting the ideas of Swamiji into practice so that our country can become AATMANIRBHAR and have a bright future in the coming days.




Next,the Guest of Honor, Prof R Sadasiva Murthy, Dean Academic Affairs gave a thought provoking speech on how views of Swamiji on Youth can empower us towards building a world leader not just in the area of physical and material prosperity but spiritual wealth too. He highlighted 6 aspects which are very vital even in our day to day activities. Chairperson of the event, Prof GSR Krishna Murthy highlighted the Sanskrit connection of Swamiji and called for the need of Sanskrit studies and the role it has in Nation build

ing. Dr Y Vijayalakshmi PO Girls Unit proposed the vote of thanks.




The program ended with Shantimantra recited by the NSS Coordinator, Prof. Satyanarayan Acharya. All the Programme Officers of NSS as Dr. A. Chandulal, Dr. R. Chandrasekhar, Dr. PTG. Rangaramanujacharya, Dr. OGP KalyanSastri, Dr. D. Jyoti, Dr. Y. Vijayalaxmi, Dr. K. Leenachandra participated with their volunteers. The staff members of ICT lab cooperated for technical assistance.










## द्विसप्ततितमः (७२) प्रजाराज्योत्सवः






द्विसप्ततितमे प्रजाराज्योत्सवे ध्वजारोहणं विधाय समान् सभ्यान् उद्बोधयन्तः मान्याः कुलपतयः



**ध्वजारोहणकार्यक्रमे समवेत: शिक्षकशिक्षकसहयोगिकर्मकरच्छात्रस्तोम:**

प्रतिवर्षमिव ऐषमोऽपि द्विसप्ततितम: प्रजाराज्योत्सव: विश्वविद्यालयस्य एस्. बी. रघुनाथाचार्यमुक्ताकाशसभागृहे महता उत्साहेन समायोज्यत । मान्या: कुलपतय: आचार्या: वि. मुरलीधरशर्ममहोदया: कार्यक्रमे समपस्थाय राष्ट्रध्वजस्य समारोहणमकार्षु: । सन्दर्भेऽस्मिन् विश्वविद्यालयस्य कुलसचिवा: संकायप्रमुखा: आचार्या: उपाचार्या: सहाचार्या: अधिकारिण: शिक्षकेतरसहयोगिन: छात्राश्च कार्यक्रमे अमुष्मिन् समुपस्थिता आसन् । विश्वविद्यालयस्य छात्रा: देशभक्तिगीतम् अगायन् । मान्या: कुलपतय: स्वकीयभाषणे विश्वविद्यलयस्य शैक्षणिकभौतिकप्रगतिम् अग्रिमकार्याणि च उदबोधयन् ।

## विभिन्नपदेषु विराजमाना: अस्माकं विश्वविद्यालयस्य आचार्या:



Prof. K.E. Devanathan
Appointed as Vice Chancellor of Karnataka Samskrit University, Bengaluru



Prof. Narasimhacharya Purohit
Nominated as Dean, Faculty of Darshanas, NSU, Tirupati

कोरोनामहामरीसंकष्टेऽपि शैक्षिककार्यक्रमान् अत्यजन्त्य: विविधशिक्षणसंस्था: अन्तर्जालीयमाध्यमेन नैकान् राष्ट्रियान्ताराष्ट्रियसंगोष्ठीपरिसंवादकार्यशालावाक्यार्थसदृशान् कार्यक्रमान् समायोजयन् । तत्र अस्माकं विश्वविद्यालयस्य आचार्या उपाचार्या: सहाचार्याश्च सक्रियं भागमूढ्वा विविधविषयेषु ज्ञानपूर्णव्याख्यानान्यदु: ।




























































इत्थं विविधानुष्ठानैः आयोजितेषु संगोष्ठ्यादिषु शैक्षिककार्यक्रमेषु अस्माकं विश्वविद्यालयस्य अध्यापकाः अन्तर्जालमाध्यमेन स्वकीयज्ञानगङ्गां प्रावाहयन् ।

# सेवानिवृत्ता आचार्याः



राष्ट्रियसंस्कृतविश्वविद्यालये साहित्यविभागस्य आचार्याः विविधशास्त्रपारंगताः सम्प्रति वैदिकविश्वविद्यालयस्य कुलपतयः मान्याः आचार्याः सन्निधानं सुदर्शनशर्ममहोदयाः २०२० सप्टेम्बर्मासे सेवानिवृत्ताः ।



राष्ट्रियसंस्कृतविश्वविद्यालये आङ्ग्लभाषायाः आचार्याः वि. सुजातामहोदयाः २०२० सप्टेम्बर्-मासे स्वकीयसुदीर्घसेवातः निवृत्ताः । ताः सम्मानयन्तः मान्याः कुलपतयः शैक्षिकसंकायप्रमुखाः, आङ्लविभागाध्यक्षाश्च ।



राष्ट्रियसंस्कृतविश्वविद्यालये उपकुलसचिवाः प्रभारिवित्ताधिकारित्वेन कार्यं कुर्वाणाः श्रीशिवशंकररेड्डिमहोदयाः २०२० सप्टेम्बर्-मासे सेवानिवृत्ताः ।



राष्ट्रियसंस्कृतविश्वविद्यालये वेदान्तविभागस्य आचार्याः पुरन्दररेड्डिमहोदयाः २०२० डिसेम्बर्-मासे सेवानिवृत्ताः ।

# Advanced Pedagogies : Active Learning and Digital Tools

## Three Day Training Program

As per the directions from Higher Officials towards using technology to improve education, governance and upgrading administrative systems, thereby making a large-scale impact on the quality of education and in day to day teaching & learning activities as a part of digitalization, millions of teachers and students are using digital tools which makes them ahead in their careers. In continuation with the existing methodologies new efforts must be made to develop the capacities of teachers and learners to make effective use of appropriate technologies for learning. With use of ICT and its applications one can have a much larger impact by improving skills and the overall education ecosystem. In this regard ICTRC Lab conducted a Training programme on " Advanced Pedagogies : Active Learning and Digital Tools " for Teaching and Non-Teaching Staff tentatively between 18/11/2020 to 20/11/2020. Online class held on Google Meet held and practicals will be at ICTRC lab, curriculum is enclosed herewith.

ICTRC created Gsuite/Microsoft Teams accounts for all Faculty members to facilitate all faculty members to use many video conferencing tools, Google Docs, Slides, Sheets, Drive, Google Calendar, Google Meet, Google Classroom, Google Forms, Google Keep, Google Sites and others. All the faculty had participated and shown keen interest in learning the digital skills and inclined towards adapting the skills in day to day teaching activities.

Hon'ble Vice Chancellor, Registrar, Deans, respective Heads of Departments and faculty members have participated in the sessions. ICTRC Incharge, System Analyst, Technical Officer and ICT advisory committee members have coordinated the training sessions in ICTRC Lab and Education ICT lab.

Training sessions under the supervision of ICTRC I/c Dr. B Chandrasekharam held by Shri MVR Purna Kumar, Technical Officer, NSU Tirupati and practical session by Dr. K Sujani, System Analyst and Shri Sethuram V, ICTRC Advisory Committee.

Curriculum of the training program

A. Collaborate Anywhere
1. Docs: All your documents, editable and shareable.
2. Slides: Presentations you can create.
3. Sheets: Smart spreadsheets you can work on from anywhere.
4. Drive: A safe place to keep, access, and share your files
Co-edit documents, spreadsheets, presentations in real time

B. Communicate Your Way
1. Gmail: Get more done with email by Google
2. Google Meet: Secure video meetings/online classes for teams
3. Chat : Google Chat allows you to securely message with your team
Connect with your classroom with email, chat & video

C. Manage your Classroom Simply
1. Classroom: Online classroom where teachers and students can interact and conduct classes
2. Forms: Collect and organize information big and small with Google Forms

Create Classes, make assignments, give quizzes and save time grading

D. Organize your tasks
1. Keep: Save your thoughts as notes, lists, and voice memos from anywhere.
2. Calendar: Organize your schedule and share events with University people

ONLINE Teaching resources, attendance etc.
Use Google Drive to store and access documents anywhere, anytime.
Manage students, devices and security
Search, Find, Replace
Grammar and Spelling suggestions improve language usage
Google Translate
Google Contacts
Youtube
Google Sites - Workshops, Conferences etc.,
Digital Skills for FUTURE

Training in Microsoft Teams/Google Gsuite will be given with both Theory, online classes and practicals in ICTRC Lab.

Tasks to do as a part of PRACTICALS in the LAB

1. Login to G Suite account with provided Email ID and PASSWORD
2. List all the applications of Gsuite for Education
3. Sharing a folder to other faculty in Google Drive
4. Creating a Google Classroom and adding another teacher
5. Adding students through invitation code and sending invitation link
6. Creating assignments to students
7. Creating quiz and scheduling to students
8. Taking feedback from through Google Forms
9. Writing an leave letter application in Google Docs
10. Conducting Video Conference through Google Meet at the scheduled time with the scheduled list of participants
11. Scheduling an event/meeting in Google Calendar and attending that in Google Meet
12. Conducting Video Conference through Google Meet at the scheduled time with the scheduled list of participants
13. Creating a PPT of words in sanskrit with their pictorial representation in Google Sheets and sharing it with screen sharing option
14. Creating OWN website of the respected faculty through GOOGLE sites
15. Using Google Translate to convert a few sentences from english to hindi and sanskrit to english.



प्रशिक्षणकार्यक्रमे प्रशिक्षणार्थिनः अध्यापकान् बोधयन्ती डा. के. सुजनीमहोदया

# ज्यौतिषविभागस्य व्याख्यानमाला:

तिरुपतिस्थराष्ट्रीयसंस्कृतविश्वविद्यालयस्य ज्यौतिषवास्तुविभागद्वारा प्रतिसप्ताहं सोमवासरे सायं 4:00 बजे एका विशिष्टव्याख्यानमाला समायोज्यते। इयं व्याख्यानमाला विभागाध्यक्षाणां विभागस्य वरिष्ठाचार्याणां च मार्गनिर्देशने तथा सहायकाचार्याणां समन्वये आयोज्यमाना वर्तते । इयं व्याख्यानमाला अन्तर्जालीयमाध्यमेन संस्कृतसमसामयिकविषयानाधृत्य प्रवर्तते। अस्मिन् व्याख्यानमालाकार्यक्रमे देशाविदेशानां मूर्धन्यविद्वांस: स्वज्ञानभण्डारेण सर्वान् सन्तोषयन्ति।










देशविदेशेषु प्रतिष्ठापितप्रतिष्ठा: नैके विद्वांस: अस्मिन् व्याख्यानकार्यक्रमे स्वकीयानि संशोधनपूर्णानि समसामयिकानि विविधविषयोपेतानि व्याख्यानान्यदु: । एतै: व्याख्यानै: सामान्यजना: संस्कृतानुरागिण: छात्रा: अध्यापकाश्च लाभान्विता वर्तन्ते । प्रतिसप्ताहं सोमवासरे इयं व्याख्यानमाला सन्ततं प्रचलति ।

# संस्कृतविषये गान्धिमहोदयः

## दिनाङ्कः - ०२.१०.२०२०

राष्ट्रियसंस्कृतविश्वविद्यालयस्य अनुवादविभागेन अनूदितस्य "संस्कृतविषये गान्धिमहोदयः" इति पुस्तकस्य सद्यस्कं विमोचनं ०२.१०.२०२० दिनाङ्के भारतसर्वकारस्य शिक्षामन्त्रिणां श्रीमतां मान्यानां डा. रमेशपोखरियाल"निशङ्क"महोदयानां करकमलाभ्यां समजनि । अस्मिन् सन्दर्भे विश्वविद्यालयस्य मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः अनुवादविभागस्य अध्यापकौ डा. नन्दनरावमहोदयः डा. कुमारः सुश्रीः एस्. वैष्णवी च समुपस्थिता आसन्। संस्कृतविषये महात्मगान्धिमहोदयस्य विचाराः नैकासु भाषासु अनूदिताः ।



परं संस्कृते एतावता अनुवादः न जातः । परं कुलपतीनां संकल्पमनुसृत्य अनुवादविभागप्राध्यापकैः एतस्य अनुवादकार्यं यशस्वितया सम्पाद्य गान्धिजयन्तीदिने माननीयानां शिक्षामन्त्रिणां करकमलाभ्याम् अन्तर्जालमाध्यमेन अस्य अनूदितग्रन्थस्य लोकाय समर्पणकार्यं कृतमिति विश्वविद्यालयस्य गौरवास्पदविषयोऽयम् ।






# विविधकार्यक्रमाणां वृत्तपरिस्पन्दः



THE NEW INDIAN EXPRESS

NATION WORLD STATES CITIES BUSINESS SPORT GOOD NEWS MOVIES GALLERIES

STOCK MARKET BSE 50405.32 -440.76(-0.87%) NSE 14938.10

Home › States › Andhra Pradesh

## Tirupati's 'National Sanskrit University' online courses evoke positive response from students

*As many as 414 students from India and abroad have evinced interest in pursuing the NSU online courses so far.*

## Sanskrit University to offer several diploma and certificate programmes

*Continued from Page 1*

Around 3,000 candidates, including those from the UK, USA, Singapore, Australia, Abu Dhabi, Sri Lanka and other countries, pursued the courses. Responding to an appeal by the candidates to continue the online courses, the NSU has come up with 22 certificate programmes of three months duration.

As many as 1,927 candidates enrolled themselves for the certificate courses held from June to August. The candidates who pursued the courses, include IT professionals, Chartered Accountants, judicial and administrative staff. The NSU also conducted a special programme Bala Gokulam of one month duration in July for high school students. In all, 54 students from 14 countries attended the programme.

"We are going to introduce certificate programmes in Samskrita Vinodah, Research Methodology in Sanskrit Education, Yoga and Stress Management and Indian Mathematics this academic year. Students and people from different professions can pursue the courses," said NSU Vice-Chancellor V Muralidhara Sarma.

The university will offer study material to students in the form of PPTs. The e-content for the certificate programmes will be provided to students free of cost.

**NSU courses**

The National Sanskrit University (NSU) has invited applications from students for various diploma and certificate programmes for the academic year 2020-21.

They include Advanced Diploma Programme in Sanskrit Satiya (one year), Diploma Programme in Functional Sanskrit (one year), Diploma Programme in Vykarana Shastra Pravesh (one year), Certificate Programme in Karaka (6 months), Certificate Programme in Vyakarana Shastra Pravesha (6 months), Certificate Programme in Functional Sanskrit (6 months), Certificate Programme in Functional Jyotisha (6 months), Certificate Programme in Vaastu (6 months), Certificate Programme in Nyaya (6 months), Certificate Programme in Traditional Kriya Yoga (6 months) and Certificate Programme in Manodharma Sangeetham (6 months).

## సంస్కృత విశ్వవిద్యాలయంలో ఆన్‌లైన్ కోర్సులు

## విద్యాపీఠం ఇండోర్ స్టేడియంలో క్రీడలు ప్రారంభం

## శారీరక, మానసిక దృఢత్వానికి క్రీడలు

రన్నింగ్ చేస్తున్న విద్యార్థులు

## ఆన్‌లైన్‌లో సర్టిఫికెట్, డిప్లొమా కోర్సులు

### విద్యాపీఠం వీసీ మురళీధరశర్మ వెల్లడి

తిరుపతి (విద్య), మే 30: తిరుపతిలోని రాష్ట్రీయ సంస్కృత విద్యాపీఠంలో జూన్ ఒకటో తేదీనుంచి ఆన్‌లైన్‌లో సర్టిఫికెట్, డిప్లొమా కోర్సులు ప్రారంభిస్తున్నట్లు వీసీ వి.మురళీధరశర్మ పేర్కొన్నారు.సంస్కృతం, యోగా, సంగీతం, జ్యోతిషంపై 18 రకాల సర్టిఫికెట్, డిప్లొమా కోర్సులను రూ.2000-2500 ఫీజుతో ఆన్‌లైన్‌లో ప్రారంభిస్తున్నట్లు తెలిపారు. ఈ కోర్సులకు ఆదివారంతో దరఖాస్తు గడువు ముగుస్తుందన్నారు. అయినా మరికొన్ని రోజులు అవకాశం కల్పిస్తామని చెప్పారు. పూర్తి వివరాలను డబ్ల్యుడబ్ల్యుడబ్ల్యు.ఎన్ఎస్‌కేటీయూ.ఏసీ.ఇన్ వెబ్‌సైట్‌లో చూడొచ్చన్నారు. లాక్‌డౌన్ నేపథ్యంలో ఏప్రిల్ ఐదు నుంచి మే 17వ తేదీవరకు ఆన్‌లైన్‌లో ఉచితంగా సంస్కృతం, యోగా తరగతులు నిర్వహించామని పేర్కొన్నారు.

# शेमुषीपरिवारः







| संरक्षकः | प्रकाशकः | सम्पादकः |
|---|---|---|
| आचार्यः वि.मुरलीधरशर्मा | कमाण्डर् च. वेङ्कटेश्वरः (निवृत्तः) | डा. शिवरामभट्टः |
| कुलपतिः | कुलसचिवः | |

Dear Readers, Your suggestions are solicited to improve the quality of Semushi. Please send your views or feedback to this mail- nsushemushi@gmail.com